## अस्मत् प्रकाशित धर्म्मशास्त्र-कर्म्मकाण्ड ग्रन्थाः ।

| | | |
|---|---|---|
| १ | अग्निष्टोमपद्धति । प्रथम-द्वितीयखण्ड । | ३—० |
| २ | अन्त्यकर्मदीपक । आशौचकालनिर्णयसहित । | १—८ |
| ३ | आपस्तम्बधर्मसूत्र । उज्ज्वलवृत्ति सहित । | ४—० |
| ४ | आपस्तम्बगृह्यसूत्र । अनाकुला-तात्पर्यदर्शनव्याख्यासहित । | ४—० |
| ५ | कातीयतर्पणपद्धति । | ०—०—९ |
| ६ | कातीयेष्टिदीपक । ( दर्शपौर्णमासपद्धति ) | १—० |
| ७ | कालमाधव । | १—८ |
| ८ | कात्यायनश्रौतसूत्र । कर्कभाष्यसहित । | ११—० |
| ९ | कात्यायनश्रौतसूत्र देवयाज्ञिकपद्धति सहितः १-८ खण्ड | १२—० |
| १० | गोभिलगृह्यसूत्र । सटीक | ३—० |
| ११ | गोभिलगृह्यकर्मप्रकाशिका । | ३—० |
| १२ | दानमयूख । | १—८ |
| १३ | निर्णयसिन्धु । कृष्णंभट्ट कृत संस्कृत टीका सहित । | २२—० |
| १४ | पारस्करगृह्यसूत्र । मूल । | ०—८ |
| १५ | पारस्करगृह्यसूत्र । हरिहर-गदाधर-जयरामभाष्यसहित । | ३—० |
| १६ | पौरोहित्यकर्मसार । सपरिशिष्टसटिप्पण । | ०-१२ |
| १७ | बौधायनधर्मसूत्र । गोविन्दस्वामीप्रणीतविवरणसहित । | ४—० |
| १८ | मनुस्मृति । कुल्लुकभट्टकृतव्याख्यासपरिशिष्टसटिप्पण । | २—४ |
| १९ | याज्ञवल्क्यस्मृति । वीरमित्रोदय-मिताक्षराटीकासहित । | ७—० |
| २० | याज्ञवल्क्यस्मृति । बालंभट्टी-मिताक्षरा-टीकासहित । | १६—८ |
| २१ | लाट्यायन श्रौतसूत्र । अग्निष्टोमान्त सटीक | २—० |
| २२ | वर्षकृत्यदीपक । कालनिर्णयव्रतोद्यापनसहित | ३—८ |
| २३ | वीरमि[illegible]दय । म० म० श्रीमित्रमिश्र[illegible] | |
| २४ | व्रात्यताप्रायश्चितनिर्णय । व्रात्यता[illegible] | |
| २५ | षडशीति । शुद्धिचन्द्रिकासहित । | |
| २६ | शुक्लयजुर्वेदीय संध्योपासनपद्धति [illegible] | |
| २७ | स्मृतिसारोद्धार । | |
| २८ | संस्कारदीपक । म०म० नित्यानन्दपन्तपर्वतीयकृत संपूर्ण । | ८—० |
| २९ | संस्कारगणपतिः । पारस्करगृह्यसूत्रविस्तृतविवरणरूपः १-८ खण्ड | १२—० |
| ३० | श्राद्धकल्पलता । श्रीनन्दपण्डितकृत । | ४—८ |
| ३१ | श्राद्धचन्द्रिका । श्रीदिवाकरभट्टकृत । | ३—० |
| ३२ | श्राद्धविवेकः । श्रीरुद्रधरकृत सटिप्पण नवीनसंस्करण । | १—० |

प्राप्तिस्थानम्—चौखम्बा संस्कृत पुस्तकालय, बनारस सिटी ।

Library IIAS, Shimla
S 294.155 K 159 S
00046029

THE

# KÂSHÎ-SANSKRIT-SERIES

( *HARIDÂS SANSKRIT GRANTHAMĀLĀ* )

## NO. 120.

( Karma Kanda Section, No. 13. )

॥ श्रीः ॥

# कात्यायनशुल्बसूत्रम् ।

## कर्कभाष्य-महीधरवृत्ति-सहितम् ।

प्रकाशकः—

जयकृष्णदास-हरिदास गुप्तः—

...म्बा संस्कृत सीरि...

91


| | | |
|---|---|---|
| | | २१ |
| | ७ | २६ |
| | ८ | ३ |
| | ८ | ८ |
| | ८ | ११ |
| ...वा | ८ | १२ |
| ...प्रमाणम् | ८ | २२ |
| ...प्रमाणम् | ९ | १ |
| ...ये दक्षिणाग्निस्थाननि० | ९ | ५ |
| | ९ | २५ |



S
294.155
K 159 S

S
294.155
K159S

Library IIAS, Shimla
S 294.155 K 159 S
00046029
S
294.155
K 159 S
46029
29-9-74

# कात्यायनशुल्बसूत्रविषयानुक्रमणिका ।


| | विषयाः | पृ० | पं० |
|---|---|---|---|
| | ग्रन्थप्रतिज्ञा | १ | ६ |
| | मङ्गलाचरणम् | १ | ७ |
| | प्राचीसाधनम् | २ | १४ |
| | उदीचीसाधनम् | ३ | १२ |
| | रज्जौ पाशकरणम् | ३ | २९ |
| | मानरज्जौ चिह्नस्थानानि | ४ | ४ |
| | प्राचीप्रतीच्योः शङ्कुनिखननम् | ४ | १७ |
| | कोणेषु शङ्कुनिखननम् | ४ | २२ |
| | तत्र अंससाधनम् | ४ | २८ |
| | अंसशब्दार्थः | ५ | ९ |
| १ | श्रोणिशब्दार्थः | ५ | ९ |
| २ | श्रोणिसाधनम् | ५ | १३ |
| ३ | रज्जुपाशकरणादेः समचतुरस्रादिष्वतिदेशः | ५ | २० |
| ४ | समचतुरस्रे निरञ्छनस्वरूपम् | ५ | २४ |
| ५ | अक्ष्णया तिर्यङ्मानी संज्ञाद्वयम् | ६ | ४वा३२ |
| ६ | महावेदि दीर्घविषमचतुरस्रसदआदौ निरञ्छनस्य लक्षणम् | ६ | १८ |
| ७ | समचतुरस्रस्य श्रोण्यंसस्थानम् | ७ | ३ |
| १८ | दीर्घचतुरस्रस्य श्रोण्यंसस्थानम् | ७ | १२ |
| १९ | शकटमुखे चयने श्रोणिस्थानम् | ७ | १७ |
| २० | प्राग्वंशवेदिमानानि | ७ | २१ |
| २१ | शालामानम् | ७ | २६ |
| २२ | शालायामुदीचीसाधनम् | ८ | ३ |
| २३ | सदोमानम् | ८ | ८ |
| २४ | सदस उदीचीसाधनम् | ८ | ११ |
| २५ | अपरिमितशब्दपरिभाषा | ८ | १२ |
| २६ | ह्रासवृद्धयोः शास्त्रोक्तं प्रमाणम् | ८ | २२ |
| २७ | ह्रासवृद्धयोः युक्तिरपि प्रमाणम् | ९ | १ |
| २८ | गार्हपत्याहवनीययोर्मध्ये दक्षिणाग्निस्थाननि० | ९ | ५ |
| २९ | उत्करस्थानम् | ९ | २५ |

| सं० | विषयाः | पृ० | पं० |
|---|---|---|---|
| ३० | दक्षिणाग्नेः स्थानान्तरम् | १० | ६ |
| ३१ | उत्करस्य स्थानान्तरम् | १० | १६ |
| ३२ | रथसम्मितवेदिमानम् | १० | २४ |
| ३३ | ईषामानम् | ११ | १ |
| ३४ | अक्षमानम् | ११ | ६ |
| ३५ | युगमानम् | ११ | ११ |
| ३६ | शम्यामानम् | ११ | १५ |
| ३७ | पैतृमेधिकदिक्कोणचतुरस्रवेदिकरणम् | ११ | १९ |
| ३८ | पञ्चरज्जुसंज्ञाः | १२ | ४ |
| ३९ | दशपदोत्तरवेदिसाधनम् | १२ | २० |
| ४० | चत्वारिंशत्पदोत्तरवेदिसाधनम् | १३ | १ |
| ४१ | युगमात्रोत्तरवेदिसाधनम् | १३ | ९ |
| ४२ | शम्यामात्रोत्तरवेदिसाधनम् | १३ | ९ |
| ४३ | क्षेत्रमानम् | १३ | १७ |
| ४४ | क्षेत्रद्वैगुण्यादिप्रकारः | १४ | ४ |
| ४५ | क्षेत्रद्वैगुण्यादिकरणे प्रकारान्तरम् | १४ | १६ |
| ४६ | क्षेत्रत्रैगुण्यकरणे प्रकारान्तरम् | १५ | ४ |
| ४७ | क्षेत्रतृतीयांशकरणप्रकारः | १५ | १६ |
| ४८ | क्षेत्रत्रिभागकरणप्रयोजनम् | १६ | १९ |
| ४९ | तुल्यप्रमाणसमचतुरस्राणामेकीकरणविधिः | १७ | १ |
| ५० | विषमप्रमाणसमचतुरस्राणामेकीकरणविधिः | १७ | ६ |
| ५१ | महत्क्षेत्राल्लघुक्षेत्रस्य पृथक्करणविधिः | १७ | २७ |
| ५२ | दीर्घचतुरस्रस्य समचतुरस्रीकरणोपायः | १८ | २८ |
| ५३ | अतिदीर्घचतुरस्रस्य समचतुरस्रीकरणविधिः | १९ | १३ |
| ५४ | समविषमचतुरस्रयोर्दीर्घचतुरस्रीकरणम् | १९ | २४ |
| ५५ | प्रमाणानुक्तौ चतुरस्रमानस्य ग्रहणम् | २० | ८ |
| ५६ | क्षेत्रफलनिरूपणम् | २० | १४ |
| ५७ | क्षेत्रफलज्ञानोपायः | २० | २२ |
| ५८ | न्यूनक्षेत्रे विशेषः | २० | ३२ |
| ५९ | चतुरस्रस्य वर्तुलीकरणम् | २१ | २९ |
| ६० | वर्तुलस्य चतुरस्रीकरणम् | २२ | १८ |
| ६१ | चितिनामानि | २३ | २ |

| सं० | विषयाः | पृ० | पं० |
|---|---|---|---|
| ६२ | द्रोणचितिनिरूपणम् | २३ | १२ |
| ६३ | रथचक्रचितिकङ्कचित्योर्निरूपणम् | २४ | ३ |
| ६४ | प्रउगचितिनिरूपणम् | २४ | ९ |
| ६५ | उभयतः प्रउगचितिनिरूपणम् | २४ | १७ |
| ६६ | प्रउगचितेश्चतुरस्रीकरणम् | २४ | २५ |
| ६७ | एककर्णसमासः | २५ | ३ |
| ६८ | उभयतः प्रउगचितेश्चतुरस्रीकरणम् | २५ | ५ |
| ६९ | द्विकर्णसमासः | २५ | ९ |
| ७० | त्रिकर्णसमासः | २५ | ११ |
| ७१ | पञ्चकर्णसमासः | २५ | १६ |
| ७२ | तत्र तुल्यकर्णानां समासः | २५ | २१ |
| ७३ | नानाविधकर्णानां समासः | २५ | २५ |
| ७४ | पुरुषवृद्धिप्रतिज्ञाः | २६ | २ |
| ७५ | आश्वमेधिकद्विगुणत्रिगुणचितिनिरूपणम् | २६ | १५ |
| ७६ | आश्वमेधिक एकविंशतिविधचितिनिरूपणम् | २७ | ३ |
| ७७ | पुरुषवर्धनप्रकारः | २७ | ११ |
| ७८ | प्रक्षेप्यपुरुषमानम् | २७ | २१ |
| ७९ | पुरुषमानकथनप्रयोजनम् | २८ | ६ |
| ८० | पुरुषवर्धने प्रकारान्तरम् | २८ | १५ |
| ८१ | पुरुषपञ्चदशभागमानम् | २९ | १ |
| ८२ | अरत्निवितस्त्यङ्गुलमानानि | २९ | ७ |
| ८३ | पुरुषवृद्धौ तृतीयप्रकारः | २९ | १९ |
| ८४ | अधिमानस्य पुरुषे प्रक्षेपनिषेधः | ३० | ७ |
| ८५ | पुरुषोच्चये वेदेरिष्टकानाञ्च वर्धनम् | ३० | २१ |
| ८६ | एकशतविधचयने वेदिवर्धनम् | ३१ | ५ |
| ८७ | द्वितीये चयने वेदिवर्धनम् | ३२ | १ |
| ८८ | तत्रैव प्रकारान्तरम् | ३२ | ११ |
| ८९ | अन्तःपात्यगार्हपत्ययोर्वृद्धिप्रतिषेधः | ३२ | २६ |
| ९० | अनेकचतुरस्रैकीकरणे प्रकारान्तरम् | ३३ | १२ |
| ९१ | यूपैकादशिन्यां वेदिवर्धनम् | ३३ | ३२ |
| ९२ | तत्रैव मतान्तरम् | ३५ | २० |


इति ।

## कात्यायनश्लोकशुल्वकर्कभाष्यस्थविषयाणामनुक्रमः


| सं० | विषयाः | पृ० | पं० |
|---|---|---|---|
| १ | पौर्णमासीवेदिनिरूपणम् | ३६ | ७ |
| २ | शुल्वेऽधिकारिनिर्णयः | ” | १० |
| ३ | भूसमीकरणम् | ” | १२ |
| ४ | शङ्कुलक्षणम् | ” | १७ |
| ५ | मुद्गरलक्षणम् | ” | २६ |
| ६ | रज्जुलक्षणम् | ” | २८ |
| ७ | सदसो मानम् | ३७ | २ |
| ८ | सौमिकरज्जुमानम् | ” | ४ |
| ९ | सौत्रामणीवेदिमानम् | ” | ६ |
| १० | खरलक्षणम् | ” | १४ |
| ११ | अङ्गुलारत्निहस्तादिमानम् | ” | १८ |
| १२ | सुवर्णादिमानम् | ” | २६ |
| १३ | इष्टकामानम् | ” | ३३ |
| १४ | चतुरस्रसाधनम् | ३८ | ६ |
| १५ | प्राचीसाधनम् | ” | १० |
| १६ | दक्षिणाग्नेः खरसाधनम् | ” | १२ |


## कात्यायनश्लोकशुल्वमहीधरवृत्तिस्थविषयाणामनुक्रमः


| | | | |
|---|---|---|---|
| १ | ग्रन्थाधिकारनिर्णयः | ३८ | २४ |
| २ | भूसमीकरणम् | ३८ | ३१ |
| ३ | शङ्कुलक्षणम् | ३९ | २ |
| ४ | मुद्गरलक्षणम् | ३९ | ८ |
| ५ | रज्जुलक्षणम् | ३९ | १४ |
| ६ | शङ्कुसमीकरणम् | ३९ | २१ |
| ७ | प्राचीज्ञानम् | ३९ | २४ |
| ८ | चतुरस्रसाधनम् | ३९ | २७ |
| ९ | प्राकृतवेदिमानम् | ४० | ४ |
| १० | प्राकृतवेदिमध्यनिर्णयः | ४० | ११ |
| ११ | पशुवेदिमानम् | ४० | ३१ |
| १२ | शालामानम् | ४१ | ४ |
| १३ | विमितमानम् | ४१ | ५ |
| १४ | सदोमानम् | ४१ | ९ |
| १५ | सौत्रामणीवेदिमानम् | ४१ | १४ |
| १६ | अङ्गुलादिमानम् | ४१ | ३२ |
| १७ | इष्टकामानम् | ४२ | १० |
| १८ | खरलक्षणम् | ४२ | १४ |
| १९ | दक्षिणाग्नेः खरसाधनम् | ४२ | २० |
| २० | इषुलक्षणम् | ४२ | २५ |
| २१ | चयनवेदिमानम् | ४२ | २८ |
| २२ | टीकाकर्तृप्रशस्तिः | ४३ | ८ |

श्रीसद्गुरवे नमः ।

श्रीकर्कभाष्येण महीधरभाष्येण च संवलितं,

# कात्यायनशुल्बसूत्रम् ।

## प्रथमा कण्डिका ।

श्रीगणेशायनमः ।

**रज्जुसमासं वक्ष्यामः ॥ १ ॥**

कर्कभाष्यम्—स जयत्युदयेनैषां चतसृष्वपि दिक्षु निवसतां नृणाम् ।
मेरोः प्रतिदिनमन्यामाशां विदधाति यः प्राचीम् ॥ १ ॥

किमर्थमिदमुच्यते ? यदाचार्येण प्राग्वंशसदो (१)हविर्धानाद्यग्निमानादीनि परामर्शमात्रेणैवोक्तानि, तेषां तत्त्वनिर्णयार्थमिदमुच्यते । ननु चाचार्येणैव नेत्स्पष्टमभि हितं वेदिं पुरस्कृत्य "व्याममात्रीं पश्चात्त्र्यरत्निं प्राचीम्"(का०श्रौ०२-६-१) इति । तथा महावेद्यां "षट्त्रिंशत्प्रक्रमां प्राचीं त्रिंशतं पश्चाच्चतुर्विंशतं पुरस्तात्" इति । (२)सदसोऽप्यायामतिर्यङ्माने अभिहिते अग्नावपि "उत्तरेषु पुरुषोच्चयेनैकशतविधात्"(का० श्रौ० १६-८-२७)इति ? तत्रोच्यते । सत्यमेतदुक्तम् । किन्तु रज्जुसमासमन्तरेण दिग्विभागज्ञानमेतदिति न सम्भावितुं शक्यते । सत्स्वप्येतेषु प्रमाणेषु पुरुषापराधात्प्राचीतो वेदिः प्रच्यवते । न च सेष्यते रज्जुसमासमन्तरेण । रज्जुसमासेन तु दिशः प्रच्युताः सर्वत्र समा भवन्तीति । अग्नावपि रज्जुसमासमन्तरेण पुरुषोच्चयेन कथं वृद्धिः क्रियत इत्यत्रैवैतदुच्यते । अतश्चाचार्येण सूत्रशेषमेवैतदुच्यते—"रज्जुसमासं वक्ष्याम" इति । प्रतिज्ञासूत्रमेतत् । (३)रज्ज्वा यत्समस्यते सङ्क्षिप्यते स रज्जुसमासः । समासग्रहणं च व्यासोपलक्षणार्थमपि । यथाऽत्र समास उच्यते-"समचतुरस्राणामुक्तः समासः" (शु०सू० २-२१) यथा "नानाप्रमाणसमासे"(शु०सू० २-२२) इति । एवं

---

( १ ) हविर्द्धानमण्डपो दशहस्तः समचतुरस्रश्च ।

( २ ) सदोमण्डपः दैर्घ्ये अष्टादशारत्निः, विस्तारे नवारत्निः तथा च मुख्यमण्डपस्याभ्यन्तर एव पूर्वभागे भवति ।

( ३ ) रज्जुलक्षणं च—

अजीर्णा ग्रन्थिनो सूक्ष्मा समा श्लक्ष्णा त्वरोमशा ।
रज्जुर्मानाधिका कार्या, अध्वरे योगमिच्छता ॥
यथा न क्षीयते मानं यथा न परिवर्द्धते ।
यथा च रमते दृष्टिः, तथा योगं समाचरेत् ॥

व्यासोऽपि "चतुरस्राच्चतुरस्रं निर्जिहीर्षन्" (शु०सू०३-१) इति । "समचतुरस्रं दीर्घचतुरस्रम्" (शु०सू० ३-४) इति च । अतः समासग्रहणेन व्यासोऽपि लक्ष्यते ॥ १ ॥

महीधरभाष्यम्—श्रीनृसिंहं नमस्कृत्य रमेशं भक्तवत्सलम् ।
शुल्बस्य विवृतिं वच्मि भाष्यवृत्त्यनुसारिणीम् ॥ १ ॥

श्रीमान् कात्यायनः पञ्चदशशाखासाधारणं कल्पसूत्रं विरच्य तत्र कथितवेद्यादिमानोपयोगितया शुल्बपरिशिष्टं चिकीर्षुः प्रतिजानीते—( रज्जु इति । )

रज्ज्वा समस्यते संक्षिप्यते यः प्रदेशः स रज्जुसमासः । समासो व्यासस्याप्युपलक्षकः ।

"चतुरस्राच्चतुरस्रं निर्जिहीर्षन्" ( शु० सू ० ३-१ ) इत्यादि वक्ष्यमाणत्वात् । रज्ज्वा संक्षिप्यते विस्तार्य्यते च यथा, तं प्रकारं कथयिष्याम इत्यर्थः ।

यद्वा रज्जोः समासः सम्यगसनं क्षेत्रानुगुणतया धारणं रज्जुसमासस्तं वक्ष्यामः । प्रतिज्ञैषा शिष्यप्रोत्साहनाय ।

ज्ञातार्थं ज्ञातसम्बन्धं श्रोतुं श्रोता प्रवर्त्तते । इत्युक्तेः ॥ १ ॥

**समे शङ्कुं निखाय शङ्कुसम्मितया रज्ज्वा मण्डलं परिलिख्य यत्र लेखयोः शङ्क्वग्रच्छाया निपतति तत्र शङ्कू निहन्ति, सा प्राची ॥ २ ॥**

क०—"इह प्राञ्चमग्निमुद्धरति"इति श्रूयते । तथा प्राग्वंशमित्येवमादि दिगायत्तम् । अतो हि दिङ्निरूपणायेदमाह—

समग्रहणं निम्नोन्नताऽग्रहणार्थम् । विषमे हि छायावैषम्यं, तत्र दिगस्पष्टा भवति । तत्र (१)शङ्कुं निखाय तत्संमितया रज्ज्वा मण्डलं परिलिखेत् । तत्र पूर्वापरयोर्लेखयोः शङ्क्वग्रच्छायानिपाते इतरौ शङ्कू निखनेत् सा दिक् प्राची दण्डसमासार्धलक्षणम् । इतरा प्रतीची इति । आदित्योदयो हि प्राच्युपलक्षणम् । न च तामन्तरेणोदयः शक्यते साधयितुमतस्तच्छायोपन्यस्ता दिग्ग्रहणार्थम् । ननु चादित्यश्चित्रास्वात्यन्तरालेऽन्यत्र वाऽन्यत्रोदेति । तत्रानेकाहःसाध्ये कर्मणि प्राची न लभ्यते । दक्षिणायने तु चित्रां यावदादित्य उपसर्पति, उदगयने स्वातीमिति । विषुवतीये त्वहनि चित्रास्वात्योर्मध्य एवोदयः । अतस्तन्मध्ये शङ्कुगतैव च्छाया भवति । एवं च सति अहरन्तरेषु सैव प्राची न भवतीति ? अत्रोच्यते । "तं प्राञ्चमुद्धरति"इत्यनेन प्राच्युद्धरणे कृतेऽनेकाहःसाध्येऽपि कर्मणि तदेवोद्धरणमित्यहरन्तरे दोषो न भवति । अपि चाभियुक्तोपदेशश्चित्रास्वात्योरन्तरालं प्राचीति, न तदन्तरालमादित्यो जहाति । तस्माद्येवोद्धरणकाले प्राची सैव सर्वत्रेति ॥ २ ॥

---

( १ ) शङ्कुश्चोपरि द्वादशाङ्गुलः, षडङ्गुलो भूमिखातो द्व्यङ्गुलपरीणाहः, यल्लक्षणं ज्योतिषे—
समतलमस्तकपरिधिः, भ्रमसिद्धो हस्तिदन्तजः शङ्कुः ।
तच्छायातः प्रोक्तं ज्ञानं दिग्देशकालानाम् ॥ इति ।

म०—प्राग्वंशादौ प्राक्शब्दः श्रूयते, तथा "इह प्राञ्चमुद्धरन्ति" इत्यादौ। अतः प्राचीज्ञानार्थमाह—( समे० इति )।

समे न्यूनपूरणाधिकखननाभ्यां समीकृते प्रदेशे शङ्कुं द्वादशाङ्गुलं सूक्ष्माग्रं पृथुमूलं निखाय स्थापयित्वा शङ्कुसम्मितया द्वादशाङ्गुलया। यद्वा, शङ्कौ सम्मितया क्षिप्तया। 'डुमिञ् प्रक्षेपे' इत्यस्य क्तान्तस्य प्रयोगः। रज्ज्वा मण्डलं वृत्तं परिलिख्य कृत्वा लेखयोर्मण्डलपूर्वापरलेखयोर्यत्र स्थले शङ्कुप्रच्छाया निपतति पश्चिमरेखायां प्रविशति, पूर्वरेखाया निःसरति, तत्र स्थलद्वये द्वौ अन्यौ शङ्कू निखनेत् चिह्नद्वयं वा कुर्य्यात्। तत्र प्राक्शङ्कुः प्राची, पश्चिमशङ्कुः प्रतीची। प्राची सूर्य्याधीना, तस्योदयस्थानानां बहुत्वात्प्रतिदिनं भिन्नत्वादनियमेन प्राची ज्ञातुं न शक्या। तस्मात् शङ्कुस्थापनेन प्राचीसाधनमुक्तम्। दक्षिणायने चित्रापर्य्यन्तमर्कोऽभ्युदेति। मेषतुलासंक्रान्त्यहे प्राच्यां शुद्धायामुदेति। ततोऽर्कात् प्राचीज्ञानं दुर्घटम्॥ २॥

**तदन्तरं रज्ज्वाऽभ्यस्य पाशौ कृत्वा शङ्क्वोः पाशौ प्रतिमुच्य दक्षिणायम्य(१)मध्ये शङ्कुमेवमुत्तरतः सोदीची॥ ३॥**

क०—इदानीमुदीच्यादिदिशो ग्रहणायेदमाह—

तयोः शङ्क्वोः प्राच्यपरस्थयोरन्तरालं रज्ज्वाऽभ्यस्य। अन्तरालाभ्यासो न सम्भवतीति रज्जुरभ्यस्यते द्विगुणीक्रियत इत्यर्थः। ततः शङ्क्वोः पाशौ प्रतिमुच्येते। प्रथमायामार्धा दण्डरज्जुर्द्विगुणीक्रियते। द्विगुणीकृतायाश्चान्तयोः पाशौ कर्तव्यौ या रज्जुस्तस्या अन्ते पाशः समासार्धेन लक्षणेन दक्षिणायम्याकृष्य मध्यमे शङ्कुं निखनेत्सा दक्षिणा। एवमुत्तरतः सोदीची दिगिति॥ ३॥

म०—अथोदीचीसाधनमाह—( तदन्तरमिति। )

तयोः प्राचीप्रतीचीसूत्रान्तस्थितशङ्क्वोः अन्तरं मध्यं रज्ज्वाऽभ्यस्य रज्ज्वा कृत्वा द्विगुणीकृत्य तदन्तरालभूभागस्य द्विगुणीकर्त्तुमशक्यत्वात् प्राचीसूत्रमितभुवं रज्ज्वा मित्वा तां रज्जुं द्विगुणयित्वा द्विगुणीकृतरज्ज्वोः अन्तयोः पाशौ कृत्वा रज्ज्वोर्मानं यथा न हीयते तथा पाशौ कृत्वा प्राचीप्रतीचीसूत्रान्तस्थितशङ्क्वोः तौ पाशौ प्रतिमुच्य प्रक्षिप्य द्विगुणीकृतरज्ज्वोर्मध्यभागं चिह्नितं दक्षिणस्यां दिशि आयम्याकृष्य यत्र रज्जुमध्यमायाति तत्र मध्यचिह्नस्थले शङ्कुं निहन्ति निखनति, सा दक्षिणा दिक्। एवमुत्तरतो द्विगुणितरज्जुमुत्तरस्यामाकृष्य मध्यभागे शङ्कुं निहन्ति, सा उदीची उत्तरा दिगित्यर्थः॥ ३॥

**रज्ज्वन्तयोः पाशौ करोति॥ ४॥**

क०—रज्ज्वन्तयोः पाशौ करोति। न ह्यन्यथा मानं सम्भवति॥ ४॥

म०—अन्यस्या अपि मानार्थाया रज्जोरन्तयोः पाशकरणनियममाह-(रज्ज्वन्ते )।

---

(१) 'मध्येशङ्कुरेव' क०

परिभाषासूत्रम् । या मानार्थं गृहीता रज्जुस्तदन्तयोः पाशौ कुर्यात् । यद्यपि पाशौ कृत्वेत्युक्तं, तथापि तिर्यङ्मान्यादिरज्जुमात्रे पाशप्रासयर्थं पुनर्वचनम् , अन्यथा मानासम्भवात् ॥ ४ ॥

**श्रोण्यꣳसनिरञ्छनसंख्यासमासभङ्गेषु लक्षणानि ॥ ५ ॥**

क०—श्रोण्यंसशब्देन तत्परिच्छेदिका रज्जुरभिधीयते । निरञ्छनमभ्यासचतुर्थं गृह्यते । वक्ष्यते हि चोपरिष्टाद् "अभ्यासचतुर्थे लक्षणं करोति" ( शु० सू० १-१२ ) इति । संख्यासमासभङ्गो दण्डरज्ज्वभ्यासरज्जुसंख्ययोः समासभङ्ग इत्यर्थः । तत्रापि च लक्षणम् ॥ ५ ॥

म०—मानार्थरज्जौ चिह्नस्थानान्याह—( श्रोण्यंसेति । )

वेद्यादेर्नैर्ऋत्यवायव्यकोणौ श्रोणिशब्दवाच्यौ, ईशानाग्निकोणावंसशब्दाभिधेयौ । निरञ्छनमभ्यासचतुर्थभागः "प्रमाणमभ्यस्याभ्यासचतुर्थे लक्षणं करोति तन्निरञ्छनम्" ( शु० सू० १-१२ ) इतिवक्ष्यमाणत्वात् । क्षेत्रायाममितैका रज्जुः दण्डरज्जुसंज्ञा, सा, तावती द्वितीयाऽभ्यासरज्जुः, तयोर्या संख्या द्वित्वलक्षणा, तस्याः समास एकीकरणं, तदर्थं भङ्गो भञ्जनं, संख्यासमासभङ्गः । श्रोणी च अंसौ च निरञ्छनं च संख्यासमासभङ्गश्च ते, तेषु लक्षणानि चिह्नानि, करोतीत्यनुषङ्गः । श्रोण्यादिपरिच्छेदकरज्जवो गृह्यन्ते तत्र चिह्नानि कुर्यात् ॥ ५ ॥

**प्राच्यन्तयोः शङ्कू निहन्ति ॥ ६ ॥**

क०—न ह्यन्यथा मितिर्भवति ॥ ६ ॥

म०—प्राचीसूत्रप्रान्तयोः शङ्कुद्वयं निखनेत् 'समे शङ्कुं निखाय' इत्यादिना यद्यपि शङ्कुनिखननमुक्तं, तथापि तत्प्राचीसाधनार्थमुक्तम् , अत्र पुनरन्यत्रापीष्टक्षेत्रे प्राचीपरिच्छेदाय शङ्कुद्वयनिखननमुच्यत इति न दोषः ॥ ६ ॥

**श्रोण्योर(१)ꣳसयोश्च ॥ ७ ॥**

क०—मानोत्तरकालमिष्टक्षेत्रपरिच्छेदाय ॥ ७ ॥

म०—कोणेषु शङ्कुनिखननमाह—( श्रोण्योरिति । )

दक्षिणोत्तरयोः श्रोण्योरंसयोरपि चतुरः शङ्कून्निहन्ति वक्ष्यमाणविधिना । रज्जुविताने यत्र रज्ज्वन्तस्तत्र कोणेषु शङ्कवो निखेया मानानन्तरं क्षेत्रपरिच्छेदाय इति तात्पर्यार्थः ॥ ७ ॥

**शङ्क्कोः पाशौ प्रतिमुच्य निरञ्छनेन गृहीत्वा दक्षिणपूर्वां दिशꣳ हरन्ति ॥ ८ ॥**

क०—पूर्वापरान्तशङ्क्कोः पाशौ प्रतिमुच्य निरञ्छनेन गृहीत्वा दक्षिणपूर्वां दिशं हरन्ति । तत्रांसलक्षणे शङ्कुः ॥ ८ ॥

---

( १ ) 'श्रोण्यꣳसयोश्च' क०

म०—श्रोण्यंससाधनमाह—( शङ्कोरिति । )

प्राचीसूत्रप्रान्तयोर्वर्त्तमानयोः शङ्क्वोः पाशौ द्विगुणितरज्ज्वन्तकृतपाशौ प्रतिमुच्य निरञ्छनेन अभ्यासचतुर्थांशकृतलक्षणेन वक्ष्यमाणेन गृहीत्वा तां रज्जुमादाय दक्षिण-पूर्वां दक्षिणस्याः पूर्वस्याः अन्तरालभूतामाग्नेयीं दिशं प्रति हरन्ति आकर्षन्ति कुशलाः। ततः सचिह्ने पूर्वोक्तः शङ्कुरेको देयः ॥ ८ ॥

## एवमुत्तरतः ॥ ९ ॥

क०—अनेनैव प्रकारेण निरञ्छनेन गृहीत्वोत्तरपूर्वां दिशं हरन्ति। तत्राप्यंसल-क्षणशङ्कुरेव स्यात्। एवं दण्डरज्ज्वा अंशपाशाच्छ्रोणिमानार्थं लक्षणम्। पुरस्तात्तिर्य-ङ्मानमंसशब्देनोक्तम्। पश्चात्तिर्यङ्मानं श्रोणिशब्देनोच्यते ॥ ९ ॥

म०—एवं शङ्कौ पाशावारोप्य निरञ्छनेन रज्जुमादाय उत्तरतः उत्तरपूर्वाम् ऐशानीं दिशं हरन्ति। तत्रोत्तरांसचिह्नेऽपरः शङ्कुर्देयः। विशालक्षेत्रे एकेन रज्जुप्रसारणस्य कर्तुमशक्यत्वाद्धरन्तीति बहुवचनम् ॥ ९ ॥

## विपर्यस्येतरतः ॥ १० ॥

क०—इतरशब्देन पश्चाद्भाग उच्यते। तत्रापि निरञ्छनेन पश्चाद्दक्षिणापरां दिशं हरेत। पुनरेवमुत्तरतः श्रोणिलक्षणयोः शङ्कू निखनेत् ॥ १० ॥

म०—इतरतः पश्चिमभागे, विपर्यस्य रज्जुपाशौ परिवर्त्य पूर्वशङ्कुपाशं पश्चिम-शङ्कौ कृत्वा पाश्चात्यं च पूर्वशङ्कौ कृत्वा निरञ्छनेन रज्जुं नैर्ऋतीं प्रत्याकृष्य दक्षिण-श्रोणौ शङ्कुर्देयः। एवमुत्तरतो वायवीं दिशं प्रत्याकृष्योत्तरश्रोणौ शङ्कुर्देयः। शङ्कवस्तू-क्ता एव 'प्राच्यन्तयोः' ( शु० सू० १-६, ७ ) इत्यादिसूत्रद्वयेन ॥ १० ॥

## स समाधिः सर्वत्र ॥ ११ ॥

क०—सर्वक्षेत्रेष्वयं (१)प्रकारः ॥ ११ ॥

म०—स उक्तः "रज्ज्वन्तयोः पाशौ करोति" (शु० सू० १-४) इत्यादिसूत्रोक्तः समाधिः समाधानं क्षेत्रमानविधिः सर्वत्र समचतुरस्रेषु दीर्घचतुरस्रेष्वपि ज्ञेयः ॥ ११ ॥

## प्रमाणमभ्यस्याभ्यासचतुर्थे लक्षणं करोति, तन्निरञ्छनम् ॥ १२ ॥

क०—रज्जुप्रमाणमभ्यस्य। अभ्यासो हि द्विगुणीकरणम्। तत्रैका दण्डरज्जुर-भ्यासरज्जुः। तत्राभ्यासप्रथमचतुर्थे लक्षणं क्रियते। संख्यासमासभङ्गाच्चतुर्थो लक्षणं गृह्यते नाभ्यासरज्ज्वन्ते। श्रोण्यंसपरिच्छेदो हि ततो भवतीति। तस्य चतुर्थलक्षण-स्य निरञ्छनसंज्ञा संव्यवहारार्था ॥ १२ ॥

म०—निरञ्छनस्वरूपमाह—( प्रमाणमिति )

प्रमाणम् इष्टक्षेत्रायामम् अभ्यस्य द्विगुणीकृत्याभ्यासचतुर्थेऽभ्यस्तरज्ज्वोश्चतु-र्थेऽशे संख्यासमासभङ्गसमीपे लक्षणं करोति, नत्वन्ते, तस्य लक्षणस्य निरञ्छनमिति

( १ ) तन्मानसाधनोपायः।

संज्ञा । निरञ्छ्यते आकृष्यतेऽनेनेति निरञ्छनं, क्षेत्रायामरज्जुर्दण्डरज्जुः, द्विगुणीकृताऽभ्यासरज्जुः, तत्र दण्डरज्जुसमीपवर्त्तिनि अभ्यासरज्जुचतुर्थेंऽशे चिह्नं कुर्य्यादित्यर्थः । निरञ्छनेनाकर्षणे कृते तिर्यग्भागत्रयं भवति । भागपञ्चकं कर्णरज्जुर्भवति ॥ १२ ॥

**अक्ष्णया तिर्यङ्मानीशेषः ॥१३॥**

क०— निरछनेन गृहीत्वा आकृष्यते साऽक्ष्णया रज्जुरुच्यते । एवं ह्युक्तं प्रदेशान्तरे । करणी तत्करणी तिर्यङ्मानी पार्श्वमान्यक्ष्णयेति रज्जवः । सा चाक्ष्णया रज्जुस्तिर्यङ्मान्याः शेषो भवति । तिर्यङ्मानी च श्रोण्यंसपरिच्छेदिका । सा हि पूर्वापरायामापेक्षया तिर्यग्भवति । अक्ष्णया रज्जुश्च तच्छेषः । न हि तया विना तिर्यङ्मानी भवति । अपरा व्याख्या—प्रागायामश्रोण्यंसमानव्यतिरिक्तायां रज्ज्वाः शेषव्यपदेशः परिच्छेदस्तया विनियोग उच्यते अक्ष्णया भवति तिर्यङ्मानी भवति । न हि तामन्तरेण श्रोण्यंसपरिच्छेदो भवति ॥ १३ ॥

म०—तयोः संज्ञाद्वयमाह—( अक्ष्णयेति । )

तिर्य्यङ्मान्याः शेषः तिर्य्यङ्मानीशेषः तिर्य्यङ्मान्याः शेषभूता या रज्जुः सा अक्ष्णयासंज्ञा । निरञ्छनेनाकर्षणे कृते श्रोण्यंसपरिच्छेदिका या रज्जुः सा तिर्यङ्मानी, सा हि प्राचीसूत्रापेक्षया तिर्यङ्मानी भवति । तच्छेषभूता या रज्जुः कर्णसूत्रभूता सा त्वक्ष्णया । यद्वा अयमर्थः-प्राचीसूत्रायामश्रोण्यंसमानातिरिक्ता रज्जुः शेषः । सा अक्ष्णया तिर्यङ्मानी च, तां विना श्रोण्यंसपरिच्छेदाभावात् ।।१३।।

**प्रमाणार्धं वाभ्यस्याभ्यासषष्ठे लक्षणं करोति तन्निरञ्छनम् ॥१४॥**

क०—अयमपरो विशेषः । महावेदेरेव मानप्रकारः प्रमाणार्धमभ्यस्येति । अष्टादशप्रक्रमोऽभ्यासः । तत्र मूलात्षष्ठे भागे लक्षणं क्रियते तन्निरञ्छनं भवति । अर्थादंसपरिच्छेद एतदेव । तदर्धे तु श्रोणेस्तदित्यंसपरिच्छेदकनिरञ्छनार्धं निरञ्छनं भवति । श्रोणिपरिच्छेदकं च तद्भवति । पश्चात्तिर्यक् त्रिंशत्प्रक्रमपक्षे चैतद्भवति ॥ १४ ॥

म०-निरञ्छनस्य लक्षणान्तरमाह--( प्रमाणार्धमिति )

दीर्घचतुरस्रे महावेदी-पत्नीशाला-सदआदौ निरञ्छनप्रकारोऽयम् । प्रमाणार्द्धमायामार्द्धं द्विगुणयित्वा द्विगुणितरज्जोः षष्ठेंऽशे संख्यासमासभङ्गनिकटवर्त्तिनि लक्षणं करोति तन्निरञ्छनम्, तदेवांसपरिच्छेदकम् । तदर्द्धं श्रोणेः परिच्छेदः । एतच्चांसस्य त्रिंशत्प्रक्रमपक्षे श्रोणेस्तु त्र्यस्त्रिंशत्प्रक्रमपक्षे बोध्यम् । अंसस्य त्रिंशत्प्रक्रमपक्षः परशाखीयः, श्रुतिकल्पसूत्राभ्यामनुक्तत्वात् । महावेद्यां षट्त्रिंशत्प्रक्रमाः, तदर्द्धमष्टादशप्रक्रमान्संवर्ध्य वर्द्धितषष्ठांशे लक्षणं, शालायां विंशतिररत्नयः, तदर्द्धं दशारत्नीनभ्यस्य षष्ठांशे चिह्नम्, एवं सदस्यष्टादशारत्नयः, तदर्द्धं नवारत्नयोऽभ्यस्याः । एवमन्येष्वपि दीर्घचतुरस्रेष्वयमेव विधिः ।।१४।।

**अक्ष्णया तिर्यङ्मानी शेषः ॥ १५ ॥**

क०—इत्युक्तार्थः ॥ १५ ॥

म०--अत्रापि तिर्यङ्मान्याः शेषो रज्जुभागोऽक्ष्णयासंज्ञा इति पूर्ववद् व्याख्या ।। १५ ।।

**प्रमाणार्द्धे समचतुरस्रस्य शङ्कुः ।। १६ ।।**

क०—ततश्च श्रोण्यंसनिष्पत्तिः ॥ १६ ॥

म०--समचतुरस्रस्य श्रोण्यंसस्थानमाह--(प्रमाणेति)

समचतुरस्रस्य तुल्यायामविस्तारस्य क्षेत्रस्य प्रमाणार्द्धे आयामार्द्धे शङ्कुर्देयः । स च अभ्यासरज्जोरर्द्धे देयः श्रोण्यंसपरिच्छेदाय ।निरञ्छनन्त्वभ्यासरज्जोश्चतुर्थेऽशे उक्तम् ।। १६ ।।

**शास्त्रवदर्द्धे दीर्घचतुरस्रस्य ।। १७ ।।**

क०—दीर्घचतुरस्रस्य यच्छास्त्रेण तिर्यङ्मानमुक्तं तस्य मध्यमेन शङ्कुः । यथा सदसि नवतिर्यगिति । महावेदेश्चतुर्विंशतिं पुरस्तादित्येतदुक्तम् ॥ १७ ॥

म०—दीर्घचतुरस्रस्य श्रोण्यंसमानमाह-( शास्त्रेति )

दीर्घचतुरस्रस्य तु शास्त्रवदर्द्धे शङ्कुर्देयः श्रोण्यंसपरिच्छेदाय शास्त्रेण उक्तं मानं तिर्यङ्मानं तत्र शास्त्रवत् , तस्यार्द्धे मध्ये शङ्कुः । महावेद्यां चतुर्विंशतिपुरस्तादित्युक्तम् । नव तिर्यगिति सदसि । तदर्द्धे द्वादशसु महावेद्यां, सार्धचतुष्टये च सदसि शङ्कुर्देयः । एवमन्यत्रापि ।। १७ ।।

**शकटमुखस्य चैवम् ।। १८ ।।**

क०—एवमेव रज्जुः ॥ १८ ॥

म०--(१) शकटमुखस्य चयनादौ शकटमुखाकृतेः त्र्यरत्निक्षेत्रस्य शास्त्रोक्तविस्तारार्द्धे श्रोण्यर्थं शङ्कुर्देय इत्यर्थः ॥ १८ ॥

**एतेन प्राग्वंशवेदिमानानि व्याख्यातानि ।। १९ ।।**

क०—एतेन अनेन प्रकारेण समचतुरस्रे प्रागुक्तं शकटमुखस्य चैवम् ॥ १९ ।।

म०—एतेन समचतुरस्रदीर्घचतुरस्ररज्जुकथनेन प्राग्वंशस्य हविर्द्धानादेः वेदेश्चैष्टिकसौमिक्यादेर्मानानि व्याख्यातानि । समचतुरस्रं प्राग्वंशं भवति, वेदिस्तु चतुर्मुखा ।। १९ ।।

**(२)शालामानं च ।। २० ।।**

क०—व्याख्यातम् ।। २० ।।

म०—शालामानमप्येतेनैव व्याख्यातम् , शालाया दीर्घचतुरस्राया विधानात् ।

---

( १ )विषमं चतुरस्रस्य

( २ ) विंशत्यरत्निः शाला स्यात्तदर्धेन तु विस्तृता ।
विमितं चतुरस्रं स्याद्द्वारत्निप्रमाणतः ॥
'विमितम्'इति मण्डपविशेषः सोमयागे प्रसिद्धः ।

विंशतिकरायामा दशकरविस्तृता यतः शाला प्रोक्ता । उदगायता तु शाला सूत्रे- पूक्ता, तामेवात्र सूत्रकारो ब्रवीति, सैव सोमे प्रागायता ग्राह्या सिद्धवत् ।। २० ।।

## तत्रोदीची प्राचीवत् ।। २१ ।।

क०—तत्रोदगायामत्वादुदीची प्राचीवद्भवति । उदञ्चं रज्जुन्यासं कृत्वा मानं कर्थव्यमित्यर्थः ।। २१ ।।

म०—तत्र शालायाम् उदीची प्राचीवत् साधनीया उत्तरायतत्वात् । शालाया आदौ उदीच्यां रज्जुन्यासं कृत्वा शङ्कू निहत्य पश्चात्तिर्यङ्मानं साध्यमित्यर्थः॥२१॥

## सदस्श्चैवम् ।।२२।।

क०—मानं भवतीति शेषः । सदोऽपि ह्युदगायामेव ॥ २२ ॥

म०—सदसि शालावन्मानं कार्य्यम् । सदोऽपि दीर्घचतुरस्रं यतः । अत्राप्यादौ उदीची प्राचीवत्साध्या ।। २२ ।।

## अपरिमितं प्रमाणाद्भूयः ।। २३ ।।

क०—यत्रापरिमितशब्दः श्रूयते तत्रोक्तप्रमाणादधिकं ग्रहीतव्यम् । बहुत्वे हि रूढोऽपरिमितशब्दः । बहुत्वं चापेक्षिकमिति । यद्वा द्वादशदीक्षा अपरिमिता वेति ।। २३ ।।

म०—परिभाषामाह-( अपरीति )

यत्रयत्रापरिमितशब्दः श्रूयते, तत्र तत्र प्रमाणादुक्तप्रमाणाद् भूयोऽधिकं मानं ग्राह्यम् , यतोऽपरिमितशब्दो बहुत्ववाची, बहुत्वापेक्षया ग्राह्यम् । "अपरिमिता वा" ( का० श्रौ० ९-३-१४ ) इति यदिष्टिवेद्यामुक्तम् , "अपरिमितेष्टकः" ( का० श्रौ० १७-७-२९ ) इति यच्च चयनेपूक्तम्, एतद्द्वयं विनोक्तमानाधिकवाच्यपरिमितशब्द इति । वेद्यां चयने च मानाभावार्थोऽपरिमितशब्द इति बोध्यम् ।। २३ ।।

## प्रमाणे शास्त्रं प्रमाणं निर्ह्रासविवृध्योः ।। २४ ।।

क०—यत्र च प्रमाणं ह्रासविवृद्ध्योस्तत्र च प्रमाणे विवृद्धौ शास्त्रतः प्रमाणवशेन विवृद्धिः । यथा (१)यूपेऽरत्निभिरिति । ह्रासोऽपि प्रमाणवशेनैव । तदेव हि श्रुतं ह्रासविवृध्योरिति ।। २४ ।।

म०--एवं सर्वत्रातिप्रसक्तौ व्यवस्थामाह-( प्रमाणे इति )

निर्ह्रासविवृद्ध्योः क्षयस्य वृद्धेश्च प्रमाणे परिच्छेदे प्रमाणं शास्त्रमेव, नान्यत् । ह्रासे वृद्धौ च शास्त्रोक्त एव ह्रासो वृद्धिश्च ग्राह्यो न स्वेच्छया । यथाऽष्टविधादिचयनेषु पुरुषमात्राभ्युच्चयेन वृद्धिः । यथा च यूपेऽरत्निभिरेवोच्छ्रायः । सौत्रामण्यां वेद्यां यथा सौमिकीवेदीतो ह्रासः सोऽपि प्रक्रमतृतीयेन मानं कृत्वैव कार्य्यः ।। २४ ।।

---

( १ ) यूपः पञ्चारत्निः पञ्चदशपर्यन्तः सोमे ।

योगश्च(१) ॥ २५ ॥

क०—यथा युज्यते घटते तथा (२)ह्रासवृद्धी कर्तव्ये नातिरिक्तन्यूने ॥ २५ ॥

म०—योगो नाम युक्तिः । युक्तिरप्याश्रयणीया । युक्त्या ह्रासवृद्धी विधेये नाधिकन्यूने ॥ २५ ॥

इतरस्य वितृतीये दक्षिणत इत्येतद्वक्ष्यामः ॥ २६ ॥

क०—तदुक्तमाचार्येण-"इतरस्य वितृतीये" ( का०श्रौ० ४-८-१८ ) इति । दक्षिणाग्निं प्रकृत्य तच्छेपत्वेनेदमुच्यते ॥ २६ ॥

म०—"इतरस्य वितृतीये दक्षिणतः" (का० श्रौ० ४-८-१८) इति यद्दक्षिणाग्निं प्रकृत्य कात्यायनेनोक्तम्, एतद्वक्ष्यामः विविच्य कथयिष्यामः ॥ २६ ॥

गार्हपत्याहवनीययो(३)रन्तरालं षड्ढा सप्तधा वा गन्तुसमं त्रेधा विभज्यापरवितृतीयलक्षणेन दक्षिणायम्य तस्मिन्नग्निः ॥२७॥

क०—गार्हपत्याहवनीययोरन्तरालरज्जुं षड्विभागां सप्तविभागां वा कृत्वा आगन्तुविभागसहितां त्रेधा विभज्यापरवितृतीयलक्षणेन दक्षिणायम्य तस्मिन्नग्निः कार्यः॥२७॥

म०—प्रतिज्ञातमाह—( गार्हपत्येति )

गार्हपत्याहवनीययोरन्तरं गार्हपत्याहवनीययोर्यं मध्यस्थाने तयोर्मध्यभागक्षेत्रमितरज्जुं षड्ढा सप्तधा वा कृत्वा षड्भागां सप्तभागां वा विधायोभयथापि आगन्तुसममागन्तुना वर्द्धितभागेन सह यथा तथा, षड्भागपक्षे षष्ठभागं विवर्ध्य, सप्तधापक्षे सप्तमभागं विवर्ध्य, विवर्द्धितभागसहितां तां रज्जुं त्रेधा विभज्य त्रिभागान् कृत्वा तत्र तृतीये तृतीये भागे सचिह्नां कृत्वा अपरवितृतीयलक्षणेनापरे पश्चिमे भागे तृतीये लक्षणं चिह्नं, तद्धृत्वा रज्जुप्रान्तपाशौ गार्हपत्याहवनीयमध्यस्थितशङ्कोर्निधाय अपरवितृतीयचिह्नेन दक्षिणा दक्षिणस्यां दिशि आयम्याकृष्य तस्मिन्नग्निः आकृष्टतृतीयभागचिह्नस्पृष्टे भूभागेऽग्निः दक्षिणाग्निः दक्षिणाग्नेर्मध्यशङ्कुरित्यर्थः ।

पक्षद्वये षड्ढाविभागपक्ष उत्तमो यतस्तत्र पार्श्वमानीतिर्यङ्मान्यौ समे स्याताम् । तदा कल्पसूत्रेणापि सममविरोधः । सप्तधा विभागपक्षे तु तयोरल्पमन्तरं स्यात् ॥२७॥

विपर्यस्योत्तरत उत्करः ॥ २८ ॥

क०—तत्र वेदिप्रमाणं षड्ढा सप्तधा वाऽऽगन्तुसमं कृत्वा त्रेधा विभज्य विपर्यस्य च पूर्ववितृतीयलक्षणेनोदगायम्य पूर्ववितृतीये उत्करः । षड्ढा सप्तधा वेत्युपप्रदर्शनमात्रम् । यथा वेद्यन्तः सम्भाव्यते तथा करणीयम् । वेद्यन्तं ह्युत्करो भवति । चात्वालेन सहोच्चारणात्-"चात्वालोत्करावन्तरेण सञ्चरः" (का०श्रौ०१-३-४१) इति ॥२८॥

---

(१) 'च' एवार्थः ।

(२) ह्रसते पाकशोपाभ्यां द्वात्रिंशद्मानमिष्टका । तस्मादर्द्धप्रमाणन्तु कुर्यान्मानाधिकं बुधः ॥

(३) 'रन्तरं' ग० ।

म०—उत्करस्थानमाह—( विपर्यस्येति )

विपर्यस्य पाशौ विपर्यस्य विपरीतौ कृत्वा यद्वा, सप्तधा वा विभक्ताऽऽगन्तु-भागसहितवर्द्धितत्रिभागचिह्नितरज्जुपाशौ विपरीतौ कृत्वा यद्वा, सप्तधा वा विपरीतौ कृत्वा पूर्वतृतीयभागचिह्नेनोदगाकृष्य चिह्नस्पृष्टभूभागे उत्करः कार्यः। उत्करो नाम परिसमूहितवेद्यादितृणधूलिपुञ्जः ॥ २८ ॥

**अपिवान्तरात्रिभागोऽनया रज्ज्वा पूर्वार्धे समचतुरस्रं कृत्वा श्रोण्यामग्निः ॥ २९ ॥**

क०—अपि वेति पक्षान्तरार्थमुक्तम्। उक्तान्तरत्रिभागेनोना तदन्तररज्जुस्तया करण्या पूर्वार्धे पूर्वाग्निं पूर्वावधीकृत्य समचतुरस्रं कार्यम्। तस्य दक्षिणश्रोण्यामग्निः॥२९॥

म०—पक्षान्तरमाह—( अपिवेति )

अपिवा यद्वा एवं दक्षिणाग्निः कार्यः। अन्तरत्रिभागोनया रज्ज्वा अन्तरे गार्हपत्याहवनीययोर्मध्ये या रज्जुः सा त्रिभागोना त्रिधा विभज्य स्वतृतीयभागेनोना कार्या। तया रज्ज्वा करण्या पूर्वार्द्धे आहवनीयमध्यात्पश्चिमभागे समचतुरस्रमुक्त-विधिना कार्यम्। तस्य श्रोण्यां दक्षिणश्रोण्याम् अग्निर्दक्षिणाग्निर्दक्षिणाग्नेर्मध्यमि-त्यर्थः। कार्य इति शेषः ॥ २९ ॥

**विपर्यस्योत्तरांऽस उत्करः ॥ ३० ॥**

क०—भवतीति वाक्यशेषः। विपर्यासाच्चापरार्द्धे चतुरस्रं कार्यम् ॥ ३० ॥

म०—विपर्यस्य वैपरीत्येन चतुरस्रं कृत्वा पश्चिमार्द्धे गार्हपत्यस्य मध्यात्पूर्वभागे तृतीयभागोनया वह्निद्वयान्तरालमितरज्ज्वा चतुरस्रं कृत्वा तस्य चतुरस्रस्योत्तरांसे उत्करः कार्य्यः ॥ ३० ॥

इति शौल्बे विवरणे महीधरविदाकृते प्राच्यादिकथनं नाम प्रथमा कण्डिकाऽगमत् ॥

## अथ द्वितीया कण्डिका ।

**अङ्गुलै रथसंमितायाः प्रमाणम् ॥ १ ॥**

क०—क्वचिच्छ्रूयते-"रथमात्र्युत्तरावेदिर्भवति" इति तदर्थमिदमाह—

रथकृच्छास्त्रे चैतद्दृष्टम् ॥ १ ॥

म०—"रथमात्र्युत्तरा" ( का० श्रौ० ५-३-११ ) इति वरुणप्रघासे रथमात्र्युत्तरा वेदिः श्रूयते, तन्निरूपणायाह—( अङ्गुलैरिति )

रथसम्मिताया वेदेः प्रमाणम् अङ्गुलैः कृत्वा। वक्ष्यामीति शेषः। रथकारशा-स्त्रेऽङ्गुलैरेव रथमानस्योक्तत्वात् ॥ १ ॥

**तत्राष्टाशीतिशतमीषा ॥ २ ॥**

क०—ईषाशब्देन पूर्वापरायामो लक्ष्यते ॥ २ ॥

म०—ईषाशब्देन रथंगतं पूर्वापरायतं काष्ठमुच्यते। तदष्टाशीत्यधिकमङ्गुलशत-मितं भवति, चतुरङ्गुलन्यूनाष्टहस्तप्रमितमित्यर्थः(१)। तेन वेदेः पूर्वापरायाम एता-वानिति भावः ॥ २ ॥

**चतुःशतमक्षः ॥ ३ ॥**

क०-अङ्गुलानां चतुःशतमक्षो भवति। अक्षशब्देन पश्चाद्दक्षिणोत्तरायामो लक्ष्यते॥३॥

म०—रथस्य पश्चाद्भागे तिर्यगायतं काष्ठमक्षशब्देनोच्यते। तच्चतुःशतं चतुरधि-कमङ्गुलशतमितमष्टाङ्गुलाधिकं हस्तचतुष्टयमित्यर्थः(२)। तेन वेदेः श्रोणिमानं तिर्य-गायामश्चतुरधिकशताङ्गुलमित इति भावः ॥ ३ ॥

**षडशीतिर्युगम् ॥ ४ ॥**

क०—इति पुरस्तात् ॥ ४ ॥

म०—वृषभस्कन्धोपरि दीयमानं काष्ठं युगं, तत् षडशीतिरङ्गुलानि द्वशाङ्गुलो-नाश्चत्वारो हस्ताः। तेन वेदेः प्राक्तिर्यगायामः षडशीत्यङ्गुल इति भावः ॥ ४ ॥

**चत्वारोऽष्टकाः शम्या ॥ ५ ॥**

क०—द्वात्रिंशदङ्गुला शम्या भवतीति यावत् ॥ ५ ॥

म०—चत्वारोऽष्टका द्वात्रिंशदङ्गुलानि शम्यामानम्। युगच्छिद्रप्रवेशार्हं काष्ठं शम्या। साऽष्टाङ्गुलाधिकहस्तमिता, शम्या चात्वालमानं लक्षयति ॥ ५ ॥

**पैतृक्यां द्विपुरुषं समचतुरस्रं कृत्वा करणीमध्ये शङ्कवः,स समाधिः ॥ ६ ॥**

क०—"दिक्स्रक्तिपुरुषमात्रं मिमीते" (का०श्रौ० २१-३-२७) इति पितृमेधे श्रूयते तदर्थमिदमुक्तम् ॥ ६ ॥

म०—"दिक्स्रक्तिपुरुषमात्रं मिमीते" (का० श्रौ० २१-३-२७) इति पितृमेधे श्रूयते। तस्यायमर्थः—दिक्षु स्रक्तयः कोणा यस्य तद्दिक्स्रक्ति दिक्कोणं चतुरस्रमित्यर्थः। अस्मिन् ग्रन्थे तु विदिक्कोणस्य चतुरस्रस्य प्रकार उक्तः, इदानीं दिक्कोणं चतुरस्रं वक्तु-माह—(पैतृक्यामिति)

पैतृक्यां पितृमेधे द्विपुरुषं पुरुषद्वयक्षेत्रफलकं समचतुरस्रं कृत्वा करणीनां चतसृणां रज्जूनां मध्येषु मध्यभागेषु शङ्कवश्चत्वारः स्युः। स उक्तः समाधिः समाधानं प्रकारो दिक्कोणचतुरस्रस्य। "समचतुरस्रस्याक्ष्णया रज्जुर्द्विकरणी" (शु० सू० २-१२) इति वक्ष्यमाणप्रकारेण पुरुषमात्रसमचतुरस्रस्य कोणसूत्रमानेन चतुरस्रे कृते द्विपुरुषक्षेत्रं तत्स-

---

(१-२) चतुर्विंशत्यङ्गुलैरेको हस्त इति रीत्येदं बोध्यम्।

मचतुरस्रं भवति । तस्य करण्यश्वतस्रः पार्श्वरज्जुद्वयं दक्षिणोत्तरदिग्वर्तमानं, तिर्यग्रज्जुद्वयं पूर्वापरदिग्वर्त्तमानम्, एवं रज्जुचतुष्टयमध्येषु चतुरः शङ्कून् दत्त्वा तेषु चत्वारि सूत्राणि पातयेत् । एवं दिगात्तकोणं समचतुरस्रं भवतीत्यर्थः ॥ ६ ॥

## करणी तत्करणी तिर्यङ्मानी पार्श्वमान्यक्ष्णया (१)चेति रज्जवः ॥ ७ ॥

क०—रज्जूनामेताः संज्ञाः । तत्र करणी नाम यया क्षेत्रं परिच्छिद्यते । यया तच्चान्यच्च क्षेत्रं परिच्छिद्यते सा तत्करणी । तिर्यङ्मानी या दीर्घचतुरस्रस्य ह्रस्वा । पार्श्वमानी तस्यैव दीर्घा । अक्ष्णयासंज्ञा कर्णजरज्जुः कोणा तिर्यक्कोणमुपगता साक्ष्णयासंज्ञा ॥ ७ ॥

म०—ग्रन्थे व्यवहारार्थं पञ्चरज्जुसंज्ञा आह—( करणीति )

करणी, तत्करणी, तिर्यङ्मानी, पार्श्वमानी, अक्ष्णया, एताः पञ्च रज्जूनां संज्ञाः । तत्र क्रियते क्षेत्रपरिच्छेदोऽनयेति करणी, प्राचीसूत्ररूपा मध्यरज्जुः । तत्क्षेत्रं द्वैगुण्यादि क्रियतेऽनया सा तत्करणी, द्विकरणी त्रिकरणी चतुःकरण्यादिः । तिर्यक् श्रोण्यंसस्वरूपं मीयतेऽनयेति सा तिर्यङ्मानी, प्राचीसूत्रान्तयोस्तिर्यग्वर्तमानं रज्जुद्वयम् । पार्श्वं मीयतेऽनया सा पार्श्वमानी, पार्श्वयोर्वर्त्तमानं पूर्वापरायतं रज्जुद्वयम् । अक्षिवत् क्षेत्रं नयतीत्यक्ष्णया, कोणसूत्रभूता मध्यरज्जुः, तस्यां दत्तायां चतुरस्रमक्षिद्वयसदृशं भवति ततोऽक्ष्णयेति कोणसूत्ररज्जुः । यद्यप्येताः संज्ञा ग्रन्थादौ वक्तव्यास्तथापीतस्तासां बाहुल्येनोपयोगादत्रैवोक्ताः । यत्र तत्र स्थितो न्यायः सर्वत्रोपयोगीति ज्ञापयितुमिति भावः ॥ ७ ॥

## पदं तिर्यङ्मानी त्रिपदा पार्श्वमानी तस्याक्ष्णया रज्जुर्दशकरणी ॥ ८ ॥

क०—तिर्यक्क्षेत्रं तिर्यक्पदप्रमाणम् पार्श्वतश्च त्रिपदप्रमाणम्, तस्याक्ष्णया रज्जुर्दशकरणी दशपदोत्तरा वेदिर्भवतीत्येतदुक्तम् ॥ ८ ॥

म०—"दशपदोत्तरवेदिर्भवति" इति सोमे श्रूयते । तत्साधनार्थमाह—(पदमिति)

तस्येतिपदश्रवणात् यस्येतिपदस्याध्याहारः । यस्य क्षेत्रस्य तिर्यङ्मानी दक्षिणोत्तरायतं सूत्रं पदं पदप्रमाणं भवति । द्वादशाङ्गुलं पदम् । यस्य च पार्श्वमानी तिर्यङ्मान्या एकतरप्रान्तात्प्रसारितं प्रागपरायतं सूत्रं त्रिपदा त्रिपदपरिमितं सार्द्धहस्तायतं भवति, तस्य क्षेत्रस्याक्ष्णया रज्जुः कोणसूत्रभूता तिर्यङ्मान्यपरप्रान्तात्पार्श्वमान्यन्तपर्य्यन्तं नीता रज्जुर्दशकरणी भवति । दशपदक्षेत्रफलकस्य चतुरस्रस्य करणी प्राचीसूत्रपरिमाणं भवतीत्यर्थः ॥ ८ ॥

---

( १ ) 'च' नास्ति ख० पु० ।

**(१)एवं द्विपदा तिर्यङ्मानी षट्पदा पार्श्वमानी तस्याक्ष्णया रज्जुश्चत्वारिꣳशत्करणी ॥ ९ ॥**

क०—चत्वारिंशोत्तरा वेदिर्भवतीत्येतदुक्तम्(२) ॥ ९ ॥

म०—चयने "चत्वारिंशत्पदोत्तरवेदिर्भवति" इत्यपि श्रूयते। तदर्थमाह—( द्विपदेति। )

यस्य क्षेत्रस्य तिर्यङ्मानी दक्षिणोत्तरसूत्रं द्विपदा पदद्वयमिता, पार्श्वमानी प्रागायतं सूत्रं षट्पदा पदषट्कमिता, तस्य क्षेत्रस्याक्ष्णया रज्जुः कोणसूत्रं चत्वारिंशत्करणी चत्वारिंशत्पदक्षेत्रफलकस्य चतुरस्रस्य साधिका भवतीत्यर्थः ॥ ९ ॥

**उपदिष्टं युगप्रमाणं शम्याप्रमाणं च दर्शनात् ॥ १० ॥**

क०—युगप्रमाणशम्याप्रमाणे उत्तरवेदिप्रमाणदर्शनात् उपदिष्टे एव ॥ १० ॥

म०—"युगमात्री वा" ( का० श्रौ० १७-३-१३ ) इति चयने सोमे च युगमात्रोत्तरवेदिः श्रूयते "शम्या मात्रीम्" ( का० श्रौ० ५-३-३० ) इति वरुणप्रघासे शम्यामात्र्युत्तरवेदिः श्रूयते। तत्प्रमाणद्वयं मयाऽभिहितमित्याह—( उपदिष्टमिति )

दर्शनादुत्तरवेदिप्रमाणस्य उभयथा दर्शनात् युगप्रमाणं "षडशीतिर्युगम्" ( शु०२-४ ) इत्युपदिष्टं, शम्याप्रमाणं "चत्वारोऽष्टकाः शम्या" ( शु० सू० २-५ ) इत्युपदिष्टं कथितम् ॥ १० ॥

**दीर्घ(३)चतुरस्रस्याक्ष्णया रज्जुस्तिर्यङ्मानी पार्श्वमानी च यत्पृथग्भूते कुरुतस्तदुभयं करोतीति क्षेत्रज्ञानम् ॥ ११ ॥**

क०—प्रमाणद्वयायामदीर्घचतुरस्रं यत्क्षेत्रं तस्याक्ष्णया रज्जुस्तिर्यङ्मानी पार्श्वमानी च यत्पृथक्कुर्वीत तदुभयमपि सङ्क्षिपति उभयं क्षेत्रद्वयं क्षेत्रज्ञानं भूप्रदेशपरिच्छेदकम् ॥ ११ ॥

म०—क्षेत्रपरिच्छेदार्थं किञ्चिदाह—( दीर्घेति। )

दीर्घचतुरस्रस्य तिर्यङ्मानीपार्श्वमान्यौ रज्जू पृथग्भूते सत्यौ यत्क्षेत्रं, यत्फलकं क्षेत्रं समचतुरस्रद्वयं कुरुतः, तदुभयमपि मिलितं दीर्घचतुरस्रस्याक्ष्णया कोणसूत्रभूता रज्जुः करोतीति क्षेत्रज्ञानं क्षेत्रमानप्रकारो ज्ञातव्य इत्यर्थः। यथोक्तं "पदं तिर्यङ्मानी त्रिपदा पार्श्वमानी तस्याक्ष्णया रज्जुर्दशकरणी" ( शु० सू० २-८ ) इति दीर्घचतुरस्रम्। तत्र पदप्रमाणा तिर्यङ्मानी पदमात्रक्षेत्रफलकं चतुरस्रं करोति। पार्श्वमानी तु त्रिपदा। सा नवपदक्षेत्रफलकं चतुरस्रं करोति। एवमुभयं मिलितं दशपदक्षेत्रफलकं चतुरस्रं जातम्। तच्च दीर्घचतुरस्रस्य पदमात्रतिर्यङ्मानीत्रिपदापार्श्वमानीभ्यां कृतस्याक्ष्णया रज्जुरेव करोतीति ज्ञेयम्। तिर्यङ्मान्याः पार्श्वमान्याश्च वर्गौ कृत्वा तावेकीकृत्य तस्य

( १ ) 'एवं' नास्ति ख० पु० ( २ ) 'शम्या प्रमाणं च दर्शनात्' अधिकं क० पु०।
( ३ ) 'दीर्घ' नास्ति क० पु०।

मूले समानीते दीर्घचतुरस्रस्य कर्णसूत्रमानमेव भवति यतः समद्विगुणं न वर्गः । मूलानयनं तु "त्यक्त्वान्त्याद्विषमात्कृतिम्" ( ली० श्लो० १० ) इति लीलावतीश्लोकेन बोध्यम् । एवमन्यत्रापि क्षेत्रज्ञानप्रकारः ॥ ११ ॥

**समचतुरस्रस्याक्ष्णया रज्जुर्द्विकरणी ॥ १२ ॥**

क०—द्वे क्षेत्रे करोतीत्यर्थः ॥ १२ ॥

म०—एवं क्षेत्रज्ञानप्रकारं संक्षेपतोऽभिधाय द्वैगुण्यादिप्रकारमाह—( समेति । )

समचतुरस्रस्य क्षेत्रस्य याऽक्ष्णया रज्जुः कर्णसूत्रभूता रज्जुः सा द्विकरणी, द्विगुणक्षेत्रस्य प्राचीसूत्रप्रमाणमित्यर्थः । यथा हस्तमात्रसमचतुरस्रस्य कर्णसूत्रं चतुस्त्रिंशदङ्गुलानि किञ्चिन्न्यूनानि तान्येव द्विहस्तचतुरस्रस्य प्रमाणम् । "यावत्प्रमाणा रज्जुर्भवति तावन्तस्तावन्तो वर्गा भवन्ति तां समस्येत्" ( शु० सू० ३-७ ) इति वक्ष्यमाणत्वात् । यथा हस्तमात्रे समचतुरस्रे चतुर्विंशत्यङ्गुलप्रमाणा रज्जुस्ततश्चतुर्विंशतिश्चतुर्विंशत्या गुणिता षट्सप्तत्यधिका पञ्चशती भवति । सा द्विगुणिता द्वापञ्चाशदधिकैकादशशती स्यात् । तस्या मूलं किञ्चिन्न्यूनचतुस्त्रिंशदङ्गुलानि तान्येव द्विहस्तसमचतुरस्रायाममानम् । एवमग्रेऽपि त्रिहस्तादौ एकहस्तवर्गं त्रिगुणादि कृत्वा तत्तन्मूलानयनेन तत्तदायामप्रमाणं बोध्यम् ॥ १२ ॥

**करणीं तृतीयेन वर्धयेत्तच्च स्वचतुर्थेनात्मचतुस्त्रिंशोनेन स विशेष इति विशेषः (१) ॥ १३ ॥**

क०—तृतीयविभागाधिकां करणीं कुर्यात् । तच्च स्वतृतीयं स्वचतुर्थेन सह । तच्चतुर्थं स्वचतुस्त्रिंशोनेन आत्मचतुस्त्रिंशविभागोनेन वर्धयेदयमपरो विशेषो द्विकरणीप्रमाणे । सा तु द्विकरणी ॥ १३ ॥

म०—द्विकरणीसाधने प्रकारान्तरमाह—( करणीमिति ) ।

करणीमेकहस्तक्षेत्रायामं तृतीयेन वर्द्धयेत् स्वतृतीयांशेन वर्द्धयेत् । तत् स्वचतुर्थेन वर्द्धयेत् । तदिति सामान्येन नपुंसकनिर्देशः । तं तृतीयांशं स्वचतुर्थेन तृतीयांशस्य यश्चतुर्थो भागस्तेन वर्द्धयेत् । किंभूतेन स्वचतुर्थेन? आत्मचतुस्त्रिंशोनेन । आत्मनश्चतुर्थांशस्य यश्चतुस्त्रिंशो भागस्तद्रहितेन स्वचतुस्त्रिंशांशहीनस्वचतुर्थभागेन तृतीयांशं वर्द्धयेदित्यर्थः । यथा हस्तमितसमचतुरस्रस्य करणी चतुर्विंशत्यङ्गुलरूपा, सा च द्विगुणीक्रियते यदा, तदा तां तृतीयांशेन वर्द्धयेत्। चतुर्विंशतेस्तृतीयांशोऽष्टावङ्गुलानि एवं द्वात्रिंशदङ्गुलानि जातानि स तृतीयांशोऽष्टाङ्गुलात्मकः स्वचतुर्थेनाङ्गुलद्वयेन पुनर्वर्द्धितस्तदा चतुस्त्रिंशदङ्गुलानि जातानि । स्वचतुर्थेन कीदृशेन? आत्मचतुस्त्रिंशोनेन । एवमङ्गुलद्वयस्य चतुस्त्रिंशो भागो यूकात्रयं, लिक्षाषट्कं, किञ्चिदूनं बालाग्रं च । तावता हीनेनाङ्गुलद्वयेन तृतीयो भागो वर्द्धितः एवं च सति द्विहस्तकरणी एतावती सम्पन्ना त्रयस्त्रिंशदङ्गुलानि, सप्त

---

( १ ) 'इति विशेषः' नास्ति क० पु० ।

यवाः, चतस्रो यूकाः, द्वे लिक्षे किञ्चिन्न्यूनवालाग्रोने। चतुस्त्रिंशत्तिला अङ्गुलावयवाः। किं बहुना भवति तावता तिलद्वयोनानि चतुस्त्रिंशदङ्गुलानि द्विहस्तकरणी इत्यर्थः। स विशेषो भेदकः करणीद्विकरण्योरिति विशेषो द्विकरणीसाधने प्रकारान्तरमित्यर्थः ॥१३॥

## प्रमाणं तिर्यक् द्विकरण्यायामस्तस्याक्ष्णया रज्जुस्त्रिकरणी ॥१४॥

क०—द्विकरण्युक्ता, त्रिकरणी वक्तव्या, सोच्यते। यत्प्रमाणं द्विगुणं कर्त्तुमिच्छति तदेव प्रमाणं तिर्यग्भवत्यायामस्तु द्विकरण्याः। अस्य क्षेत्रस्य साक्ष्णयारज्जुस्त्रिकरणी। त्रीणि क्षेत्राणि सङ्क्षिपतीत्यर्थः ॥ १४ ॥

म०—एवं द्विकरणीं प्रोच्य त्रिकरणीसाधनमाह—( प्रमाणमिति। )

प्रमाणं त्रिगुणीकर्तुमिष्टस्य क्षेत्रस्य करणीरूपं तिर्यक् प्रसार्य तिर्यङ्मानी कर्त्त-व्या। द्विकरणी पूर्वमुक्तं द्विकरणीमानम् एकहस्तस्याक्ष्णयारूपम्। आयामः पूर्वाप-रायतं पार्श्वमानीत्वेन प्रसार्यम्। एवं क्षेत्रे त्रिकोणे दीर्घचतुरस्रे वा कृते तस्य क्षेत्र-स्याक्ष्णया रज्जुः कर्णसूत्ररूपा त्रिकरणी भवति हस्तमात्राणि त्रीणि चतुरस्राणि सङ्क्षि-पतीत्यर्थः। यथा हस्तमाना तिर्यङ्मानी, किञ्चिदूनचतुस्त्रिंशदङ्गुलमिता पार्श्वमानी, तयोरग्रप्रापिता कर्णरज्जुस्त्रिकरणी, त्रिहस्तक्षेत्रस्य करणी साधिका। तया साधितं सम-चतुरस्रं त्रिहस्तं भवतीत्यर्थः ॥ १४ ॥

## तृतीयकरण्येतेन व्याख्याता ॥ १५ ॥

क०—अस्याः प्रयोजनमाह—( तृतीयेति )

सौत्रामण्यामुक्तम्–"प्रक्रमतृतीयेनावृत्तेन" (का०श्रौ०१९-२-२) इति। प्रक्रम-तृतीयं च न प्रक्रमत्रिभागः। किं तर्हि? प्रक्रमतृतीयकरणी रज्जुरुच्यते। सेयं तृतीय-करणी यया वेदेस्तृतीयो विभागः सङ्क्षिप्यते। एवं हि श्रूयते—"वितृतीये यजेत, वितृतीयो यज्ञस्य सौत्रामणी" इति ॥ १५ ॥

म०—करणीकथनस्य प्रयोजनमाह—( तृतीयेति। )

एतेन त्रिकरणीकथनेन तृतीयकरण्यपि व्याख्याता "प्रक्रमतृतीयेनावृत्तेन" ( का० श्रौ० १९-२-२ ) इति सौत्रामण्यामुक्तं, तत्र प्रक्रमस्य तृतीयो भागः प्रक्रमतृतीयं न भवति, किन्तु या करणी प्रक्रमक्षेत्रतृतीयांशं समचतुरस्रं करोति सा प्रक्रमतृतीयशब्दे-नोच्यते, सैव तृतीयकरणी "वितृतीये यजेत वितृतीयं वै सोमस्य सौत्रामणी" इति श्रूयते। तत्र तया तृतीयकरण्या प्रक्रमत्वेन कल्पितया या वेदिर्मीयते सा सोमवेदेस्तृ-तीयांशरूपा स्यात् ॥ १५ ॥

## प्रमाणविभागस्तु नवधा ॥ १६ ॥

क०—कथं चेयं वितृतीयकरणी भवतीति तदाह—

प्रक्रमप्रमाणभागो नवधा ॥ १६ ॥

म०—एवं त्रिकरणीकथनेन कथं तृतीयकरणी व्याख्यातेति स्पष्टयितुमाह—( प्रमाणेति । )

प्रमाणस्य प्रक्रमरूपस्य विभागो विभजनं नवधा विधेयं द्वादशाङ्गुलपदम् । त्रिपदप्रक्रमप्रमितया रज्ज्वा क्षेत्रं चतुरस्रीकृत्य तत्र तिर्यङ्मान्यौ पार्श्वमान्यौ च त्रेधा विभज्य पूर्वापरायतं दक्षिणोत्तरायतं सूत्रद्वयं दद्यात् । एवं नवधा भागो भवति, एकैको भागः पदपदक्षेत्रफलकः स्यात् ॥ १६ ॥

## करणीतृतीयं नवभागः ॥ १७ ॥

क०—करणीतृतीयेन नवमो भागः सङ्क्षिप्यते ॥ १७ ॥

म०—करण्याः प्रक्रमरूपायास्तृतीयं तृतीयो भागः पदरूपः करणीभूय चतुरस्रं कुर्वन् नवभागो भवति नवमं भागं पदं संक्षिपतीत्यर्थः ॥ १७ ॥

## नवभागास्त्रयस्तृतीयकरणी ॥ १८ ॥

क०—प्रक्रमक्षेत्रस्य त्रिभिर्नवभागैस्तृतीयो विभागः सङ्क्षिप्यते । अतश्च तृतीयकरणी ॥ १८ ॥

म०—प्रक्रमरूपकरणीकृतस्य समचतुरस्रस्य ये त्रयो नव भागाः सा तृतीयकरणी । सा चैवं कार्या पदमितया करण्या समचतुरस्रं कृत्वा तत्कर्णसूत्रं पदद्विकरणीरूपं पार्श्वमानीं कृत्वा पदमितकरणीमेव तिर्यङ्मानीं विधाय ताभ्यां दीर्घचतुरस्रे कृते तत्कर्णरज्जुः तृतीयकरणी सा च करणीभूय यत्समचतुरस्रं कुर्यात्तत्र त्रयो नवभागाः संक्षिप्यन्ते ॥ १८ ॥

## सौत्रामण्यां प्रक्रमार्था ॥ १९ ॥

म०—एवं तृतीयकरण्येतेन व्याख्यातेति प्रतिज्ञातं सप्रपञ्चं सूत्रत्रयेण निरूप्य तृतीयकरण्याः प्रयोजनं सूत्राभ्यामाह—( सौत्रामण्यामिति । )

सौत्रामण्यां सौत्रामणीयागे प्रक्रमार्था प्रक्रमकथनाय तृतीयकरण्युक्तेति शेषः । सौत्रामण्यां तृतीयकरणीरूपप्रक्रमेण सोमवद्वेदिर्निर्मिता सती सौमिक्या वेदेस्तृतीयांशरूपा स्यात् ॥ १९ ॥

## (१)तृतीयकरणी समासार्था ॥ २० ॥

क०—त्रिकरणी पुनर्नवविभागास्त्रयः समासार्थाः । तैर्हि समासैः प्रक्रमपरिच्छिन्नक्षेत्रस्य तृतीयो विभागो लभ्यते । अतश्चात्र प्रक्रमनवभागत्रयकरण्येव प्रक्रमः ॥२०॥

म० त्रिकरणी तृतीयकरणीयं कथिता, सा समासार्था त्रयाणां प्रक्रमनवभागानां सङ्क्षेपार्था, विना तया नवभागस्य सङ्क्षेप्तुमशक्यत्वात । अतः प्रक्रमनवभागत्रयमेव सौत्रामण्यां प्रक्रम इत्यर्थः ॥ २० ॥

---

( १ ) 'त्रिकरणी' ग० पु०

**तुल्यप्रमाणानाᳫं समचतुरस्राणामुक्तः समासः ॥ २१ ॥**

क०–कश्चित्तुल्यद्विकरणीप्रमाणेन समचतुरस्राणां तुल्यप्रमाणानां समासो विहितः॥२१॥

म०—उक्तं चतुरस्रसमासं निगमयति—( तुल्येति । )

तुल्यं प्रमाणं येषां तानि तुल्यप्रमाणानि हस्तादिरूपाणि, तादृशानां समचतुरस्राणां समासः सङ्क्षेप एकीकरणमुक्तं दशकरणीचत्वारिंशत्करण्यादिकथनेन ॥ २१ ॥

**नानाप्रमाणसमासे ह्रसीयसः करण्या वर्षीयसोपच्छिन्द्यात्तस्याक्ष्णया रज्जुरुभे समस्यतीति समासः ॥ २२ ॥**

क०—इदानीमतुल्यप्रमाणानां समचतुरस्राणां समासोऽभिधीयते—

नानाप्रमाणसमासे कर्त्तव्ये यद् ध्रसीयसो लघुतरं प्रमाणं तदीयया करण्या वर्षीयसो महतः प्रमाणस्य परिच्छेदे कृते ततो महतः पार्श्वमान्यन्तं नीता तस्याक्ष्णया रज्जुः सोभे प्रमाणे समस्यतीति समासोऽयम् ॥ २२ ॥

म०—अतुल्यप्रमाणानां समचतुरस्राणां समासमाह—( नानेति । )

नानाप्रमाणानां भिन्नप्रमाणानां समचतुरस्राणां समासे संक्षेपे कार्ये ह्रसीयसो (१)ह्रस्वं तस्य समचतुरस्रस्याष्टाङ्गुलादेः करण्या वर्षीयसो वृद्धतरस्य द्वादशाङ्गुलादेः करणीं पार्श्वमानीं तिर्य्यङ्मानीं वाऽपच्छिन्द्यात् । ह्रस्वकरणीमानेन दीर्घकरणीं कोणमितां चिह्नयित्वा अवशिष्टं चतुरङ्गुलादिभागं जह्यात् । तस्य ह्रस्वकरणीमानेन छिन्नस्य दीर्घक्षेत्रस्याक्ष्णया कर्णसूत्रं रज्जुः करणीभूयान्यच्चतुरस्रं कुर्वतो उभे ह्रसीयोवृद्धतरे क्षेत्रे समस्यति सङ्क्षिपति इति समासोऽतुल्यप्रमाणसमचतुरस्रसङ्क्षेपप्रकारः ।

यथा द्वादशाङ्गुलकरणीकमेकं चतुरस्रं, तत्राष्टाङ्गुलकरणीकं समसितव्यम् । तत्र द्वादशाङ्गुलकरण्यां कोणादारभ्याष्टाङ्गुलेषु चिह्नं कुर्यात् । चतुरङ्गुलानि त्यक्त्वा चिह्नादारभ्याभिमुखकोणान्तं कर्णसूत्रं दत्त्वा तन्मितकरण्या यच्चतुरस्रान्तरं क्रियते तत्र ह्रस्वमहतोः क्षेत्रयोः समासः स्यात् । एवमन्ययोरपि ह्रस्वमहतोः क्षेत्रयोः समासप्रकारो बोध्यः ॥ २२ ॥

इति शौल्वे विवरणे महीधरविनिर्मिते चतुरस्रादिकथनं
द्वितीया कण्डिकाऽगमत् ॥ २ ॥

## अथ तृतीया कण्डिका ।

**चतुरस्राच्चतुरस्रं निर्जिहीर्षन्यावन्निर्जिहीर्षेत्तावदुभयतोऽपच्छिद्य शङ्कुं निखाय पार्श्वमानीं कृत्वा पार्श्वमानीसम्मितामक्ष्णयां तत्रोपसᳫंहरति, स समासेऽपच्छेदः, सा करण्येष निर्ह्रासः ॥१॥**

---

( १ ) ह्रस्वं प्रमाणमित्यर्थः ।

क०—इदानीं ह्रासकरणायोपन्यासः। महत्प्रमाणाच्चतुरस्रात्क्षेत्राल्लघुप्रमाणं निर्जिहीर्षन्निर्हर्तुमिच्छन्निपतनं कर्त्तुमिच्छन्नित्यर्थः। यावन्निर्जिहीर्षेन्निर्हर्तुमिच्छेत्तावन्महतः क्षेत्रस्योभयतोऽपच्छिद्य शङ्कू निखनेच्छङ्कुसम्मितां च पार्श्वमानीं कृत्वोत्तरपार्श्वं पार्श्वमानीता प्रत्यक्ष्णया यथा भवति तथोपसंहरेत् सम्पातयेत् तत्रापच्छेदः कर्त्तव्यः। सा करणी यावत्क्षेत्रं परिच्छिद्यते तन्नेतरद् निर्हृतं भवति एष निर्ह्रासः ॥ १ ॥

म०—एवं ह्रस्वमहतोः क्षेत्रयोः समासं निरूप्य तयोरेव (१)ह्रासं निरूपयितुमाह—( चतुरिति। )

चतुरस्रात् महतः समचतुरस्रात् चतुरस्रं ह्रस्वं समचतुरस्रं निर्जिहीर्षन् निर्हर्तुमिच्छन् यावत् निर्जिहीर्षेत् यत्प्रमाणं ह्रस्वसमचतुरस्रं निर्हर्तुं पृथक्कर्तुमिच्छति तावत् तत्प्रमाणां करणीमुभयतोऽपच्छिद्य उभयोर्महच्चतुरस्रपार्श्वमान्योरपच्छिद्य श्रोणित आरभ्याङ्कयित्वा शङ्कू निखाय तच्चिह्नद्वये द्वौ शङ्कू रज्जुप्रसारणार्थं निखाय प्रक्षिप्य पार्श्वमानीं कृत्वा तच्छङ्कुद्वयप्रसारितां महच्चतुरस्रस्य करणीभूतां रज्जुं पार्श्वमानीत्वेन परिकल्प्य, पार्श्वमानीसम्मितां तामेव रज्जुमक्ष्णयां कर्णसूत्रं तत्राधस्तिर्य्यङ्मान्यामुपसंहरति प्रसारयति एकतरशङ्कौ रज्जुपाशं निक्षिप्य तां रज्जुं तिर्यङ्मान्यामधः कर्णसूत्रत्वेन प्रसारयति। स समासेऽपच्छेदः समासे क्षेत्रद्वयैक्ये कृते सति स अपच्छेदः त्याज्योंऽशः। तस्यां रज्जौ तिर्यङ्मानीस्पृष्टायां त्रिकोणे जाते त्रिकोणबहिर्भूतो यो महाचतुरस्रतिर्यङ्मानीभागः सोऽपच्छेदस्त्यक्तव्यः। सा करणी त्रिकोणान्तःपाती तिर्यङ्मानीभागः करणी, तया करण्या कृतमन्यच्चतुरस्रं ह्रस्वक्षेत्रे महतः पृथक्कृते शेषक्षेत्रं भवतीत्यर्थः। एष निर्ह्रासः महत्क्षेत्राद्ध्रस्वस्य पृथक्करणोपायः।

यथा पञ्चविंशतिहस्तफलकात्पञ्चहस्तसमचतुरस्रान्नवहस्तक्षेत्रफलकं त्रिहस्तसमचतुरस्रं पृथक् क्रियते तदा पञ्चहस्तक्षेत्रे श्रोणिद्वयाद्धस्तत्रयं मित्वा पार्श्वमान्योरङ्कद्वयं कृत्वा तत्र शङ्कुद्वयं निखाय तन्मितां रज्जुं कृत्वैकतरशङ्कौ रज्जुं धृत्वाऽधस्तिर्यङ्मान्यां प्रसार्य यत्र पतति तत्र चिह्नं कुर्य्यात्। तत्र पञ्चहस्तकर्णं त्रिहस्तपार्श्वमानीकं चतुर्हस्ततिर्यङ्मानीकं त्रिकोणं स्यात्। तिर्यङ्मान्यां त्रिकोणबहिर्भूतो यो हस्तमितभागः स त्याज्यः। शेषहस्तचतुष्टयमितकरण्या कृतं षोडशहस्तक्षेत्रफलकं समचतुरस्रं स्यात्। एवं त्रिहस्तं पृथक्कृतं भवति। पञ्चविंशतेः सकाशान्नवानां पृथक्करणे षोडशैव शिष्यन्ते, पार्श्वमानीतिर्यङ्मानीवर्गद्वयैक्यमूलस्य कर्णरूपत्वात् करणीवर्गस्य समचतुरस्रक्षेत्रफलरूपत्वाच्च ॥१॥

**दीर्घचतुरस्रं समचतुरस्रं चिकीर्षन्मध्ये तिर्यगपच्छिद्यान्यतराद्विभज्येतरत्पुरस्ताद्दक्षिणतश्चोपदध्याच्छेषमागन्तुना (२)पूरयेत्तस्योक्तो निर्ह्रासः ॥ २ ॥**

क०—दीर्घचतुरस्रं प्रमाणद्वयपरिमाणं समचतुरस्रं कर्त्तुमिच्छन्मध्ये तिर्यगपच्छिद्या-

---

(१) 'व्यासं' ख० (२) 'सम्पूरयेत्' ख० पु०।

न्यतरद्विभज्य पुरस्ताद्दक्षिणतश्चोपदध्यात् । शेषमागन्तुना पूरयेत्तस्य च निर्ह्रास उक्तः । समचतुरस्रात्समचतुरस्रं निर्जिहीर्षन्नि(१)त्यत्र ॥ २ ॥

म०—इदानीं दीर्घचतुरस्रस्य समचतुरस्रीकरणोपायमाह—( दीर्घेति । )

दीर्घचतुरस्रं विस्तारद्विगुणायामं चतुरस्रं समचतुरस्रं चिकीर्षन् कर्तुमिच्छन् मध्ये विस्तृतितुल्येंऽशे तिर्यक्रज्जुं प्रसार्यापच्छिद्य विभज्यान्यतरत् अधोगतमूर्ध्वं वा समचतुरस्रं विभज्य पूर्वापररज्ज्वा भागद्वयं कृत्वा तद् भागद्वयं पुरस्ताद्दक्षिणतश्चोपदध्यात् एकं भागं दीर्घचतुरस्रलक्षणं पूर्वत्राविभक्तसमचतुरस्रतिर्यगायामं कृत्वा योजयेत्, अन्यं भागं तस्य दक्षिणस्यां प्रागायामं कृत्वा योजयेत्। शेषं समचतुरस्रे क्रियमाणे न्यूनमाग्नेयकोणगतमष्टमांशमागन्तुनाऽध्याहृतेनाष्टमांशेन पूरयेत् ।

नन्वेवं सति समचतुरस्रमधिकं जातमष्टमांशस्याध्याहृतत्वादत आह—तस्योक्तो निर्ह्रासः । तस्यागन्तोरंशस्य निर्ह्रासस्त्यागः कार्यः । स च त्यागप्रकार उक्तः "चतुरस्राच्चतुरस्रं निर्जिहीर्षन्" ( शु० सू० ३-१ ) इति सूत्रे ॥ २ ॥

**अतिदीर्घं चेत्तिर्यङ्मान्यापच्छिद्यापच्छिद्यैकसमासेन समस्य शेषं यथायोगमुपसंहरेदित्येकः समासः ॥ ३ ॥**

क०—अथ यद्यतिदीर्घं भवति ततस्तिर्यङ्मान्याऽपच्छिद्यापच्छिद्य नानाप्रमाणसमासेन समस्य शेषस्य च यथायोगमुपसंहारः कार्यः ॥ ३ ॥

म०—एवं विस्तारद्विगुणायामस्य दीर्घचतुरस्रस्य समस्योपायमुक्त्वेदानीं विस्तारद्विगुणाधिकायामस्य दीर्घचतुरस्रस्य समचतुरस्रत्वमाह—( अतिदीर्घमिति )

अतिदीर्घं विस्तारद्विगुणाधिकायामं चेद्दीर्घचतुरस्रं भवति, तदा तिर्यङ्मान्या दक्षिणोत्तररज्ज्वाऽपच्छिद्यापच्छिद्य पुनः पुनर्विभज्य एकसमासेन नानाप्रमाणसमासविधिना समस्य संयोज्य शेषमुर्वरितमपि यथायोगं यथा युज्यते तथोक्तविधिनोपसंहरेत् संयोजयेत् इत्येकः समासः एकसमचतुरस्रीकरणोपायः । "एकसमासेन समस्य" ( शु० सू० ४-३ ) इति वक्ष्यमाणत्वादिदं संज्ञाकथनम् ॥ ३ ॥

**समचतुरस्रं (२)दीर्घचतुरस्रं चिकीर्षन् मध्येऽक्ष्णयाऽपच्छिद्य(३)तच्च विभज्यान्यतरत्पुरस्तादुत्तरतश्चोपदध्याद्विषमं चेद्यथायोगमुपसंहरेदिति व्यासः ॥ ४ ॥**

क०—समचतुरस्रं दीर्घचतुरस्रं कर्तुमिच्छन्मध्ये चापरं भागमक्ष्णया विभक्तमपच्छिद्यान्यभागस्य विभज्य पुरस्तादुत्तरतश्चोपदध्यात । यदा तु विषमं क्षेत्रं तदाऽवशिष्टं यथायोगमुपसंहरेत् ॥ ४ ॥

म०—समचतुरस्रस्य दीर्घचतुरस्रत्वमाह—( समेति । )

समचतुरस्रं दीर्घचतुरस्रं चिकीर्षन् विस्तारद्विगुणायामं कर्तुमिच्छन् मध्येऽक्ष्णया

( १ ) 'इत्यत्रार्थः' क० पु० । ( २ ) 'दीर्घचतुरस्रं' नास्ति क० पु० । ( ३ ) 'तच्च' नास्ति ख० पु० ।

वाय्वग्निगतकोणसूत्रेणापच्छिद्य विभज्यापच्छिन्नमेकांशं पुनर्विभज्य नैर्ऋतकोणादक्षिणयाऽर्द्धं यावद् भागद्वयं कृत्वा इतरत् एकं भागं चतुर्थांशरूपं व्यत्यस्य पूर्वस्यां योजयेत्, अन्यमुत्तरस्यां व्यत्यस्य योजयेत्। तथा सति दिक्कोणविस्तारद्विगुणायामदीर्घचतुरस्रं स्यात् क्षेत्रज्ञानमात्रमेवास्य प्रयोजनम्। विषमं चतुरस्रं भवति। तद् यदि विस्तारद्विगुणायतदीर्घचतुरस्रं क्रियते तदा तद्यथायोगमुपसंहरेत् युक्त्यनुसारेण पूर्वोक्तैकसमासयुक्त्योपसंहरेत् समस्येत् समस्य समचतुरस्रं कृत्वा तत उक्तयुक्त्या दीर्घचतुरस्रं कुर्यात् इति व्यासो विस्तारः, समचतुरस्रस्य दीर्घचतुरस्रत्वेन प्रसार इत्यर्थः॥ ४॥

**प्रमाणं चतुरस्रमादेशादन्यत्॥ ५॥**

क०—अनादेशे प्रमाणं चतुरस्रं भवति आदेशादन्यत्॥ ५॥

म०—नियमविशेषमाह—( प्रमाणमिति। )

प्रमाणे वक्तव्ये अनादेशे चतुरस्रं समचतुरस्रमेव प्रमाणं ग्राह्यं धिष्ण्यादौ। आदेशे तु प्रमाणविशेषकथने तु अन्यत् यत्र यदुक्तं तत्र तदेव मण्डलादिकं ग्राह्यं गार्हपत्यचित्यादिवत्॥ ५॥

**द्विःप्रमाणा चतुःकरणी, त्रिःप्रमाणा नवकरणी, चतुःप्रमाणा षोडशकरणी॥ ६॥**

क०—(द्वि)अरत्निप्रमाणया रज्ज्वा मितं क्षेत्रं चतुरस्रं चतुररत्निर्भवति। एवं त्र्यरत्निप्रमाणया नवारत्निक्षेत्रं भवति। चतुरस्रं चतुररत्निश्चेत्षोडशारत्निर्भवति॥ ६॥

म०—क्षेत्रफलं वक्तुमुपक्रमते—( द्विः प्रमाणेति। )

द्विःप्रमाणा करणी द्विहस्तप्रमाणकरणीकृतं समचतुरस्रं चतुर्हस्तक्षेत्रफलकं स्यात्। एवं त्रिःप्रमाणकरणीकृतं नवहस्तक्षेत्रफलकं, चतुःप्रमाणा करणी चतुर्हस्तकरणी तत्कृतं समचतुरस्रं षोडशहस्तफलकं भवति॥ ६॥

**यावत्प्रमाणा रज्जुर्भवति तावन्तस्तावन्तो वर्गा भवन्ति तान्समस्येत्॥ ७॥**

क०-किं चात्र बहुनोक्तेन—यावत्प्रमाणा रज्जुस्तावतामेव वर्गाणां समासं करोति। वर्गशब्देन च सा सा सङ्ख्या तद्गुणैवोच्यते। यथा पञ्चानां पञ्चविंशतीत्येवमादि॥ ७॥

म०—किं बहुना क्षेत्रफलज्ञानायैवं विधेयमित्याह—( यावदिति। )

यावत्प्रमाणा पञ्चषट्सप्तहस्तादिमिता रज्जुर्भवति तावन्तस्तावन्तस्तत्तत्प्रमाणा वर्गा भवन्ति, तत्तत्क्षेत्रफलरूपा इत्यर्थः। समद्विराशिगुणनं वर्गः। यथा पञ्चहस्तक्षेत्रं पञ्चविंशतिहस्तक्षेत्रफलकम्। एवमग्रेऽपि षड्ढस्तादौ बोध्यम्। तान्त्समस्येत् तेषां वर्गाणां समासं कुर्यात् नानाप्रमाणसमासविधिना पुरोक्तेनेत्यर्थः॥ ७॥

**अर्धप्रमाणेन पादप्रमाणं विधीयते॥ ८॥**

क०—अर्धप्रमाणया रज्ज्वा चतुर्भागः सङ्क्षिप्यते विधीयते इति सङ्क्षेपार्थः ॥ ८ ॥

म०—न्यूनक्षेत्रस्य विशेषमाह—( अर्धेति । )

करण्या यया अर्धमानरज्ज्वा समचतुरस्रं क्रियते तत्र पादप्रमाणं विधीयते तत्करणीचतुर्थांशः सङ्क्षिप्यते । यत्करण्या अर्धकृतं तत्क्षेत्रफलचतुर्थांशफलकं तत्क्षेत्रं भवतीत्यर्थः । यथा करणी २४ तदर्द्धं १२ तत्कृतं चतुरस्रं भुजकोटिघातेन १४४ एतत्फलकं जातम् । एतत् २४ करणीचतुरस्रफलस्य ५७६ एतावतश्चतुर्थांशः । एवमन्यत्रापि ॥८॥

## तृतीयेन नवमोंऽशः ॥ ९ ॥

क०—करणीतृतीयविभागेन नवमो भागः सङ्क्षिप्यते ॥ ९ ॥

म०—करण्यास्तृतीयांशमितरज्ज्वा कृतेन समचतुरस्रेण नवमोंऽशो गृह्यते तत्करणीनवमो भागः सङ्क्षिप्यते ॥ ९ ॥

## चतुर्थेन षोडशी कला ॥ १० ॥

क०—चतुर्थविभागेन च षोडशो भागः ॥ १० ॥

म०—यत्करणीचतुर्थांशमितया रज्ज्वा समचतुरस्रं क्रियते तेन षोडशी कला षोडशोंऽशः संक्षिप्यते ॥ १० ॥

## एष निर्ह्रासस्तस्य पुरस्तादुक्तं शास्त्रम् ॥ ११ ॥

क०–तस्य ह्रासस्य शास्त्रं पुरस्तादुक्तम् । "चतुरस्राच्चतुरस्रं निर्जिहीर्षन्" ( शु० सू० ३-१ ) इत्यत्र ॥ ११ ॥

म०—एष पूर्वोक्तः 'अर्द्धप्रमाणेन' इत्यादिना चतुर्थनवमषोडशाद्यंशानां निर्ह्रासो महतः क्षेत्रात्पृथक्करणम् स च कथं विधेय इत्याशङ्कायां तस्य निर्ह्रासस्य शास्त्रं शिक्षाप्रकारः पुरस्तात्पूर्वमुक्तं "चतुरस्राच्चतुरस्रं निर्जिहीर्षन्" (शु०सू०३-१) इत्यत्र॥११॥

## यावत्प्रमाणा रज्जुर्भवतीति विवृद्धे ह्रासो भवति ॥ १२ ॥

क०—अनेन क्षेत्रविवृद्धिरुक्ता । "अर्धप्रमाणेन(१) पादप्रमाणम्" ( शु० सू० ३-८ ) इत्यनेन ह्रासः ॥ १२ ॥

म०—"अर्द्धप्रमाणेन पादप्रमाणम्" ( शु० सू० ३-८ ) इत्यादिना यः क्षेत्रस्य ह्रासः समास उक्तः स कस्य ह्रास इत्यपेक्षायां "यावत्प्रमाणा रज्जुर्भवति तावन्तस्तावन्तो वर्गा भवन्ति" ( शु० सू० ३-७ ) इति सूत्रेण या क्षेत्रफलरूपा वृद्धिरुक्ता, तस्या विवृद्धेरयं ह्रासो भवति । यथा करणीचतुर्थांशेन चतुरस्रे कृते करण्याः षोडशांशस्य समास इत्यादि ॥ १२ ॥

## चतुरस्रं मण्डलं चिकीर्षन्मध्यादंसे निपात्य पार्श्वतः परिलिख्य तत्र यदतिरिक्तं भवति, तस्य तृतीयेन सह मण्डलं परिलिखेत्स समाधिः ॥ १३ ॥

( १ ) 'अर्धप्रमाणेन च' क०

A 6071

क०—चतुरस्रं क्षेत्रपरिमाणं मण्डलं वृत्ताकारं कर्त्तुमिच्छन्मध्यादंसे रज्जुनिपातं कृत्वा पार्श्वतस्तेन मानेन परिलिखेत् । तत्र च यदतिरिक्तं भवति तस्य तृतीयविभागेन सह मण्डलपरिलेखं कुर्यात् ॥ १३ ॥

म०—चतुरस्रस्य मण्डलीकरणमाह—( चतुरस्रमिति । )

चतुरस्रं समचतुरस्रं मण्डलं वृत्तं कर्तुमिच्छन् मध्यादंसे निपात्य चतुरस्रमध्यभागाद् अंसे एकस्मिन् सूत्रं दत्वा चतुरस्रे कर्णसूत्रद्वये दत्ते सूत्रयोः संयोगस्थलं मध्यमिति बोध्यम् । पार्श्वतः मध्यादारभ्य यत्पार्श्वं करण्यर्द्धं, तन्मानेन परिलिख्य मध्यादारभ्यांसान्तं पातितं कर्णसूत्रार्द्धमङ्कयित्वा तत्र कर्णसूत्रार्द्धं यदतिरिक्तम् अङ्कनादधिको भागो भवति, तं त्रेधा विभज्य तस्य शिष्टस्य तृतीयेनांशेन सह करण्यर्द्धं संवर्द्धय तन्मानेन व्यासार्द्धेन मण्डलं परिलिखेत् कुर्य्यात्, स समाधिः मण्डलकरणविधिरित्यर्थः । यद्वा, मध्यादंसे सूत्रं निपात्य पार्श्वे एकत्र तेनाक्ष्णयार्द्धमानेन परिलिख्य सूत्रं दत्वा तत्र सूत्रे यदतिरिक्तं करण्यर्द्धाधिकं, तस्य तृतीयांशेन सह तत्सहितकरण्यर्द्धेन मण्डलं कुर्यात्, उभयथापि तावदेवायातीत्यर्थः । तद्वृत्तं चतुरस्रतुल्यक्षेत्रफलं भवति, यथा षोडशाङ्गुलस्य चतुरस्रस्य मध्यादंसान्तं कर्णसूत्रमेकादशाङ्गुलं भवति, तत्र पार्श्वमानाष्टाङ्गुलैश्चिह्ने कृते शेषमङ्गुलत्रयं, तत्तृतीयो भागोऽङ्गुलं, तत्सहिताष्टाङ्गुलमानेन नवाङ्गुलरज्ज्वा मध्याद् वृत्ते कृतेऽष्टादशाङ्गुलं वृत्तं षोडशाङ्गुलचतुरस्रतुल्यक्षेत्रफलं स्यादिति ॥ १३ ॥

**मण्डलं चतुरस्रं चिकीर्षन् विष्कम्भं पञ्चदशभागान्कृत्वा द्वावुद्धरेच्छेषः करणी ॥ १४ ॥**

क०—मण्डलमेव चतुरस्रं कर्त्तुमिच्छन् विष्कम्भमायामं पञ्चदशधा कुर्यात् तत्र च द्वावुद्धरेत् अपनयेत् शेषं चतुरस्रकरणी ॥ १४ ॥

म०—मण्डलस्य चतुरस्रीकरणमाह—( मण्डलमिति । )

वृत्तक्षेत्रं चतुरस्रं कर्तुंकामो विष्कम्भं वृत्तव्यासं पञ्चदशभागान् कृत्वा पञ्चदशधा भक्त्वा द्वौ भागौ उद्धरेत् त्यजेत् । शेषत्रयोदशभागरूपा करणी, तत्करणीकृतं समचतुरस्रं वृत्तक्षेत्रफलं स्यात् ।

(१)( इदं स्थूलमानेनोक्तम् । सूक्ष्मन्तु अष्टादशभागान् कृत्वा द्वौ त्यजेत् । तदुक्तं वार्तिके—

वृत्तव्यासं नवांशे वा परिहृत्याथ तां वदेत् ।
करणी चतुरस्रार्थमल्पमेवान्तरं भवेत् ॥ इति । ) ॥ १४ ॥

इति शौल्वे विवरणे महीधरविनिर्मिते समासव्यासकथनं तृतीया कण्डिकाऽगमत् ॥३॥

---

( १ ) कंसान्तर्गतं नास्ति ष० ।

## अथ चतुर्थी कण्डिका ।

**द्रोणचिद्रथचक्रचित्कङ्कचित्प्रउगचिदुभयतः प्रउगः समुह्यपुरीष इत्यग्नयः ॥ १ ॥**

क०—स्पष्टम् । एतेऽग्नयः ॥ १ ॥

म०—एवं चतुरस्रादिक्षेत्राणि निरूप्याग्निचितीर्निरूपयितुं तन्नामान्याह-(द्रोणेति ।) इति षडग्नयः, अग्निप्रणयनाधारभूताश्चितय इत्यर्थः । शतपथे सूचिता अन्यत्र विवृताः । अत्र तु क्षेत्रसमासार्थमुक्ताः । द्रोणः समचतुरस्रं तदाकारा चितिर्द्रोणचित् १, रथचक्रं वृत्तं तदाकारा चिती रथचक्रचित् २, कङ्को बको गगनगः; तदाकारा चितिः कङ्कचित् ३, प्रउगं त्रिकोणं रथाङ्गं तदाकारा चितिः प्रउगचित् ४, उभयतस्तदाकारा(१) मध्यस्थूला चितिरुभयतःप्रउगः ५, समुह्यम् अन्यत आनेयं पुरीषं मृत्तिका यत्र समुह्यपुरीषः ६, इति चितिः ॥ १ ॥

**द्रोणे यावानग्निः सपक्षपुच्छविशेषस्ताव(२)चतुरस्रं कृत्वा द्रोणदशमविभागो वृन्तमित्येके ॥ २ ॥**

क०—द्रोणः समचतुरस्रः । स्वहस्तार्थोऽयमारम्भः यावानग्निः सपक्षपुच्छविशेषो नानाप्रमाणेन समस्य तावच्चतुरस्रं कृत्वा द्रोणदशभागो वृन्तमित्येक इच्छन्ति ॥ २ ॥

म०—एवमग्नीनुद्दिश्य क्रमेण तेषां क्षेत्रसमासमाह—( द्रोणे इति )

एके आचार्य्या इति वदन्ति यद्द्रोणे द्रोणचितौ सपक्षपुच्छविशेषः पक्षौ च पुच्छं च पक्षपुच्छं, तदेव विशेषस्तत्सहितो यावानग्निर्यावदग्निक्षेत्रं सार्द्धसप्तपुरुषादि तावत्समचतुरस्रं कृत्वा नानाप्रमाणसमासविधिना पक्षौ पुच्छं च समस्य समचतुरस्रं कृत्वा द्रोणस्य दशमो भागो वृन्तं वृन्ताकारं स्वल्पचतुरस्रं योजनीयमिति ॥ २ ॥

**(३)तद्दशमेनापच्छिद्यापच्छिद्यैकसमासेन समस्य निर्हृत्य सर्वमग्निं तथाकृतिं कृत्वा पुरस्तात्पश्चाद्वोपदध्यात् ॥ ३ ॥**

क०—तस्मिन्पक्षे तस्यैव दशमेनापच्छिद्यापच्छिद्यैकसमासेन समस्य शेषं सर्वमग्निं तथाकृतिं कृत्वा निर्हृतं वृन्तमग्नेः पुरस्तात्पश्चाद्वोपदध्यात् ॥ ३ ॥

म०—तद्योजनविधिमाह—( तद्दशमेनेति । )

तत् पूर्वोक्तं समचतुरस्रं तस्य दशमांशेन तिर्य्यगूर्ध्वं च दशधा भक्त्वा शतांशीकृत्य दशांशरूपेण दशमभागेनापच्छिद्यापच्छिद्य "अतिदीर्घच्छेत्" ( शु० सू० ३-३ ) इत्युक्तेनैकसमासविधिना समस्य एकीकृत्य तं दशमांशं निर्हृत्य पृथक्कृत्य शिष्टं सर्व-

---

( १ ) त्रिकोणाकारा । ( २ ) 'त्समचतुरस्रं' ख० ।

( ३ ) द्वितीयं तृतीयं चेति सूत्रद्वयं कपुस्तकानुसारेणैकमेव वर्तते । परन्तु इतोऽग्रे खपुस्तकानुसारेण सूत्राङ्का निर्दिष्टा इति बोध्यम् ।

मग्निं तथाकृतिं द्रोणाकारं कृत्वा निर्हृतं दशमांशं पुरस्तात्पश्चाद्वोपदध्याद्वृन्तत्वेन योजयेत् ॥ ३ ॥

**मण्डलेऽप्येवम् ॥ ४ ॥**

क०—इयांस्तु विशेषः । चतुरस्रीकृत्य मण्डलविधानेन मण्डलं कुर्यात् । वृन्तमग्निं च ॥ ४ ॥

म०—मण्डले वृत्ते रथचक्रचितौ कङ्कचितावप्येवमेव पूर्ववत्पक्षपुच्छसमासेन चतुरस्रं कृत्वा तद्दशमांशमपहृत्य चतुरस्रं मण्डलं पूर्वोक्तविधिना कृत्वा वृन्तमपि वृत्तं विधाय पुरः पश्चाद्वा योजयेदित्यर्थः ॥ ४ ॥

**प्रउगे यावानग्निः सपक्षपुच्छविशेषस्तावद्द्विगुणं चतुरस्रं कृत्वा यः पुरस्तात्करणीमध्ये शङ्कुर्यौ च श्रोण्योः सोऽग्निः ॥ ५ ॥**

क०—इति निगदव्याख्यातम् ॥ ५ ॥

म०—प्रउगचितिमाह—( प्रउगे इति । )

प्रउगे त्रिकोणचितौ पक्षपुच्छसहितो यावानग्निस्तावच्चतुरस्रं कृत्वा तत्पुनर्द्विकरण्या द्विगुणीकृत्य द्विकरणीरूपकरण्या समचतुरस्रं पुनर्विधाय पूर्वत्र तिर्यङ्मानीमध्ये यः शङ्कुः, श्रोण्योश्च यौ द्वौ शङ्कू, तत्र सूत्रत्रये दत्ते द्विगुणीकृतार्द्धं यत्त्रिकोणं जातं सा प्रउगचितिः ॥ ५ ॥

**उभयतः प्रउगे तावदेव दीर्घचतुरस्रं कृत्वा करणीमध्येषु(१) शङ्कवः स समाधिः ॥ ६ ॥**

क०—एतदपि निगदव्याख्यातम् ॥ ६ ॥

म०—उभयतः प्रउगचितिमाह—( उभयत इति । )

उभयतःप्रउगे तत्संज्ञकचितौ सपक्षपुच्छं चतुरस्रं कृत्वा तावदेव पुरस्ताद्वर्द्धयित्वा विस्तारद्विगुणायामं दीर्घचतुरस्रं विधाय करणीनां चतसृणां मध्यभागेषु चत्वारः शङ्कवो देयाः । तत्र सूत्रचतुष्के दत्ते उभयतस्त्रिकोणाकारा चितिर्भवति, स समाधिश्चितिप्रकारः ॥ ६ ॥

**प्रउगं चतुरस्रं चिकीर्षन्मध्ये प्राञ्चमपच्छिद्य विपर्यस्ये(२)तरत उपधाय दीर्घचतुरस्रसमासेन समस्येत्स समाधिः ॥ ७ ॥**

क०—पुनरपि दीर्घचतुरस्रसमासेन समस्येत्स समाधिः ॥ ७ ॥

म०—प्रउगस्य चतुरस्रीकरणोपायमाह—

प्रउगं त्रिकोणं चतुरस्रं समचतुरस्रं कर्त्तुमिच्छन् मध्ये त्रिकोणमध्ये प्राञ्चं पूर्वभागमपच्छिद्य विभज्यैकं भागं विपर्यस्य विपरीते पश्चिममुखं त्रिकोणं कृत्वा इतरतः

(१) 'षु' नास्ति क० । (२) 'उत्तरतः' क० ।

द्वितीयभागरूपे त्रिकोणे उपधाय संयोज्य दीर्घचतुरस्रे जाते दीर्घचतुरस्रसमासेन "दीर्घचतुरस्रं समचतुरस्रं चिकीर्षन्" ( शु० सू० ३-२ ) इत्याद्युक्तविधिना समस्येत् समचतुरस्रं कुर्य्यात् स समाधिः त्रिकोणस्य समचतुरस्रत्वविधिः । एवमेककर्णसमास उक्तः ॥७॥

## उभयतः प्रउगं चेन्मध्ये तिर्यगपच्छिद्य पूर्ववत्समस्येत् ॥ ८ ॥

क०—ऋजुम् ॥ ८ ॥

म०—उभयतस्त्रिकोणं चेत्समचतुरस्रं कर्तुमिच्छति, तदा मध्ये स्थूलभागे तिर्यगपच्छिद्य विभज्य पूर्ववत्समस्येत् "मध्ये प्राञ्चमपच्छिद्य" ( शु० सू० ४—७ ) इत्याद्युक्तविधिना दीर्घचतुरस्रं विधाय पुनरुक्तप्रकारेण समचतुरस्रं कुर्य्यात् इति कर्णद्वयसमासः ॥८॥

## एतेनैव त्रिकर्णसमासो व्याख्यातः ॥ ९ ॥

क०—प्रकारेणेति शेषः ॥ ९ ॥

म०—एतेनैव प्रकारेण अस्त्रिद्वयसमासकथनेन त्रिकर्णसमासः त्रिकर्णानां त्रयाणाम् अस्त्रीणां समास एकीकरणं व्याख्यातं कथितम्, एकैकं दीर्घचतुरस्रं विधाय तत उक्तविधिना समस्येत् इत्यर्थः ॥ ९ ॥

## पञ्चकर्णानां च ॥ १० ॥

क०—पञ्चकर्णानां क्षेत्राणामेतेनैव प्रकारेण समासः ॥ १० ॥

म०—पञ्चकर्णानां पञ्चानाम् अस्त्रीणां च समास एतेनैव प्रकारेण व्याख्यातः । उभयतःप्रउगविधिना द्वे द्वे समस्य चतुर्षु समचतुरस्रीकृतेषु पञ्चमं चतुरस्रीकृत्य नानाप्रमाणसमासविधिना मध्ये क्षिपेदित्यर्थः ॥ १० ॥

## प्रउगेऽपच्छिद्यै(१)ककर्णानाम् ॥ ११ ॥

क०—एककर्णानां द्विकर्णानां क्षेत्राणामभ्युक्तप्रकारेण समचतुरस्रं कुर्यात् ॥ ११ ॥

म०—एककर्णानां तुल्यकर्णानां पञ्चास्त्रीणां प्रउगेऽपच्छिद्योक्तरीत्या समासः कार्यः ॥ ११ ॥

## (२)द्विकर्णानां समचतुरस्रेऽपच्छिद्य ॥ १२ ॥

म०—द्विकर्णानां नानाविधकर्णानां पञ्चास्त्रीणां मध्ये यथायोगमेकैकविधकर्णं क्षेत्रद्वयं समचतुरस्रीकृत्य ह्रस्वकरण्या वृद्धकरणीमपच्छिद्य "नानाप्रमाण" ( शु०सू०२-२२ ) इत्युक्तविधिना समासः कार्य्यः ॥ १२ ॥

इति शौल्बे विवरणे महीधरविनिर्म्मिते समासकथनं नाम चतुर्थकण्डिकाऽगमत् ॥ ४ ॥

---

( १ ) "पञ्चकर्णानां च प्रउगेऽपच्छिद्य" इत्येकमेव सूत्रं वर्तते द्वितीयसूत्रे च 'एककर्णानाम्' नास्ति 'क'पुस्तके । ( २ ) इदं सूत्रं नास्ति 'क'पुस्तके, नापि च कर्केणव्याख्यातम् ।

## अथ पञ्चमी कण्डिका ।

### उत्तरेषु पुरुषोच्चयेनैकशतविधादित्येतद्वक्ष्यामः ॥ १ ॥

क०—'उत्तरेषु पुरुषोच्चयेन'इति यदुक्तमाचार्येण तन्नोच्यते ॥ १ ॥

म०—(१)( चयने"द्विपुरुषाᳬ रज्जुं मित्वा" "उभयतः पाशां मध्ये लक्षणम्" (का०श्रौ०१६-८-१,२) इत्यादिसूत्रैः प्रथमाग्निक्षेत्रसाधनं कल्पे एवोक्तं स सप्तविध इत्युच्यते । इदानीमष्टविधाद्यग्निक्षेत्रेषु पुरुषाभ्युच्चयं वक्तुं प्रतिजानीते-)(उत्तरेष्विति ।)

"उत्तरेषु पुरुषोच्चयेनैकशतविधात्" ( का० श्रौ० १६-८-२७ ) इति यत्कात्यायनेन कल्पे उक्तम् , एतत्पुरुषोच्चयविधानं वक्ष्यामः कथयिष्यामः । 'उत्तरेषु' इति कल्पसूत्रस्यायमर्थः-उत्तरेषु द्वितीयादिचयनेषु पुरुषोच्चयेन पुरुषस्योच्चयेन वृद्ध्या एकैकपुरुषवृद्ध्याऽग्निमानं भवति कियत्पर्यन्तमत आह—

आ एकशतविधात् । एकशतविधपुरुषपर्यन्तम् । आद्योऽग्निः सार्द्धसप्तपुरुषक्षेत्रफलकः सप्तविधः, द्वितीयोऽष्टविधः, तृतीयो नवविध इत्याद्येकशतविधपुरुषपर्यन्तं पञ्चनवतिः । अश्वमेधे च द्वावन्यौ द्विगुणत्रिगुणसंज्ञौ वक्ष्यमाणौ एवं सप्तनवतिरग्निचयनभेदा इत्यर्थः । एवं पुरुषोच्चयो य उक्तस्तं वक्ष्यामः ॥ १ ॥

### आद्योऽग्निर्द्विगुणस्त्रिगुणो भवतीति सर्वसमासः ॥ २ ॥

क०—आद्यमग्निं चतुरस्रीकृत्य द्विकरणीसमासेन समस्येत् । त्रिपुरुषेऽप्येवं त्रिकरणीसमासेनेति शेषः । उभयत्राग्निमानाय द्विपुरुषा रज्जुरुत्पादयितव्या ॥ २ ॥

म०—तत्रादावाश्वमेधिकं चयनद्वयमाह—(आद्योग्निरिति ।) आद्यः प्रथमोऽग्निः सार्द्धसप्तपुरुषक्षेत्रफलकः, स द्विगुणो भवति, त्रिगुणश्च भवति इत्येवं सर्वसमासः सर्वस्य पक्षपुच्छसहितस्य क्षेत्रस्य समासः कार्यः । अयमर्थः—सार्द्धसप्तपुरुषक्षेत्रफलकम् आद्याग्निक्षेत्रं पक्षपुच्छसहितं "नानाप्रमाणसमासे" (शु० सू० २-२२) इत्याद्युक्तोपायेन समचतुरस्रं (२)कार्य्यं, तस्य करणी तृतीयांशयुतानि सप्त(३)विंशतिपदानि पञ्चयवोपेतानि च स्युः "तस्याक्ष्णया रज्जुर्द्विकरणी" ( शु० सू० २-१२ ) इत्याद्युक्तरीत्या तस्य सार्द्धसप्तपुरुषक्षेत्रफलकस्य समचतुरस्रस्याक्ष्णया रज्जुरूपया करण्या कृतं चतुरस्रं पञ्चदशपुरुषक्षेत्रफलकं भवति, स द्विगुणः । तन्मानं च यवद्वयन्यूननवाङ्गुलाधिकान्यष्टत्रिंशत्पदानि । एवं तत्त्रिकरण्योक्तविधिना साधितया कृतं चतुरस्रं सार्द्धद्वाविंशतिपुरुषक्षेत्रफलकं द्वियवाधिकपञ्चाङ्गुलोपेतसप्तचत्वारिंशत्पदकरणीकं त्रिगुणमग्निक्षेत्रं त्रिगुणनामकं भवति । तत्र च द्विगुणत्रिगुणाग्निक्षेत्रयोरात्मनः करणी द्विपुरुषा रज्जुरिति व्यवहार्या । तया "द्विपुरुषाᳬ रज्जुं मित्वा" ( का० श्रौ० १६-८-१ ) इत्यादिकल्पोक्तप्रकारेण पक्षपुच्छसहित आत्मा साधनीयः । इदं चाग्निद्वयं पञ्चनवते-

( १ ) कंसान्तर्गतमवतरणं नास्ति 'घ' पुस्तके । ( २ ) 'कृत्वा' घ० ।
( ३ ) 'विंशति' नास्ति घ० ।

भिन्नमेवाश्वमेधिकम् । वेदिश्चानयोश्चतुर्दशविधैकविंशतिविधयोरिव क्रमात् ज्ञेया । अन्यानुपदेशात् ॥ २ ॥

**एकविꣳशतिविधो भवतीति पुरुषाभ्यासः ॥ ३ ॥**

क०—पूर्वाग्निक्षेत्रप्रमाणे एव पुरुषप्रमाणे क्षेत्राभ्यासः कार्यः ॥ ३ ॥

म०—कल्पसूत्रेऽश्वमेधप्रकरणे उक्तम् "आद्योऽग्निर्द्विगुणस्त्रिगुण एकविꣳशतिविधः" ( का०श्रौ०२०-४-१९ ) इति । तत्र द्विगुणत्रिगुणावुक्त्वैकविंशतिविधमाह—( एकेति । )

'एकविꣳशतिविधो भवति' इति यदुक्तं, तत्र पुरुषाभ्यासः कार्य्यः । सप्तविधाग्निक्षेत्रे एकैकपुरुषाभ्यासेनाष्टविधादिषु जायमानेषु चतुर्दशपुरुषाभ्यासे एकविंशतिविधो भवतीत्यर्थः ॥ ३ ॥

**पुरुषाभ्यासे यावानग्निः सपक्षपुच्छविशेषस्तावच्चतुरस्रं कृत्वा तस्मिन्पुरुषप्रमाण(१)मवदध्यात् ॥ ४ ॥**

क०—तत्र प्रमाणमाह—

सपक्षपुच्छेऽग्नौ चतुरस्रीकृते पुरुषप्रमाणं क्षेत्रमवदध्यात् ॥ ४ ॥

म०—पुरुषाभ्यासप्रकारमेवाह—( पुरुषेति । )

पुरुषाभ्यासे क्रियमाणे सपक्षपुच्छविशेषः पक्षपुच्छलक्षणेन विशेषेणाधिमानेन सहितो यावानग्निः सार्द्धसप्तपुरुषक्षेत्रफलक आद्यः, तावच्चतुरस्रं कृत्वा नानाप्रमाणसमासविधिना समचतुरस्रीकृत्य तस्मिन् चतुरस्रीकृतेऽग्नौ पुरुषप्रमाणं साधिमानं पुरुषक्षेत्रमवदध्यादावपेत् नानाप्रमाणसमासविधानेनैव पुरुषप्रमाणं प्रक्षिपेत् । एवं सार्द्धाष्टपुरुषात्मकं चतुरस्रं भवति ॥ ४ ॥

**समस्तं पञ्चदशभागान्कृत्वा द्वावेकसमासेन समस्येत्स पुरुषः॥५॥**

क०—अत्राग्निप्रमाणाय पुरुषप्रमाणमाह—

आद्योऽग्निरर्धाष्टमपुरुषप्रमाणः । पञ्चदशभागद्वयेन चार्धाष्टमविभागो भवति । आद्येऽपि चाग्नौ अर्धाष्टमविभाग एव पुरुषोऽर्धाष्टमविभाग एव भवति । इहापि पुरुषप्रमाण एव क्षेत्रे प्रक्षिप्ते अर्धाष्टमविभागेन पुरुषविवृद्धिर्भवति । एवमेकशतविधात्पुरुषाभ्यासः कार्यः (२) ॥ ५ ॥

म०—तत्र द्वितीयचयने कियान् पुरुषभागः प्रक्षेप्तव्य इत्याशङ्कायां तत्र क्षिप्तं पुरुषमानं पृथक् दर्शयति—( समस्तमिति । )

समस्तं कृतपुरुषप्रमाणसमासं सार्द्धाष्टपुरुषक्षेत्रफलकं समचतुरस्रं पञ्चदशभागान् कृत्वा पार्श्वमान्योस्तिर्यङ्मान्योर्वा समं पञ्चदशधा विभज्य द्वौ भागौ पञ्चदशौ दीर्घ-

---

( १ ) 'मुपदध्यात्' क०

( २ ) इतोऽग्रे 'तस्य दशमविभागेन पादमात्री भवति' इति भाष्ये 'क' पुस्तके पाठो दृश्यते अग्रिमसूत्रे च तावान् भागो नास्ति तच्च सूत्रमग्रिमसूत्रभाग एवेति च ।

चतुरस्त्ररूपौ एकसमासेन समस्येत् नानाप्रमाणसमासविधिना समचतुरस्रं कुर्यात्, स पुरुषः तत्पुरुषप्रमाणमित्यर्थः । अत्र पञ्चदशाङ्गुलविस्तारं विंशत्यधिकशताङ्गुलदीर्घं क्षेत्रं दीर्घचतुरस्रात्मकं भवति । तद् द्वयं समचतुरस्रीकृतं पुरुषप्रमाणं तावद्द्वितीय-चयने वर्द्धत इत्यर्थः । आएकशतविधादेवमेव पञ्चदशभागद्वयेन वृद्धिर्भवति । तद्द्विती-यचयनादौ पञ्चदशभागद्वयमर्द्धाष्टमविभागरूपं भवति ॥ ५ ॥

## पञ्चविभागेन बृहती (१)तस्य दशमविभागेन पादमात्री भवति ॥६॥

म०—पुरुषप्रमाणस्य पृथक्दर्शने प्रयोजनमाह—( तस्येति । )

तस्य समचतुरस्रीकृतस्य पुरुषप्रमाणस्य दशमेन करणीदशमांशेन पादमात्री पद्या नामेष्टका भवति । पुरुषकरणीदशमो भागः पद्या, करणीक्षेत्रफलशततमो भागः । पञ्चमेन बृहती पुरुषकरणीपञ्चमभागेन क्षेत्रफलपञ्चविंशतिभागेन बृहती नामेष्टका, बृहत्याः करणीत्यर्थः । पद्याबृहत्योः कथनमन्यासामुपलक्षकम् । पद्याकरण्यर्द्धं पादभागः, पादोना बृहतीकरणी जङ्घामात्री बृहत्यर्द्धमर्द्धबृहती पद्यार्द्धमर्द्धपद्या पादभागार्द्धमद्धर्ध-पादभागा तदर्धं चतुर्थभागा पादमात्रविस्तारा जङ्घामात्री दैर्घ्याध्यर्द्धा जङ्घामात्री-विस्तारा बृहतीदैर्घ्या त्रिग्राहिणीत्यादि ज्ञेयम् ॥ ६ ॥

## पुरुषं वा पञ्चमेनोभयतोऽपच्छिद्य पञ्चवि(२)भागान्समस्य तृतीयं निर्हृत्य तस्मिन्पुरुषप्रमाणेऽवदध्यादित्यपरम् ॥ ७ ॥

क०—पुरुषस्य पञ्चविंशतिधा विभक्तस्य पञ्चसु भागेषु समसितेषु तृतीये च निर्हृते षोडशाङ्गुलो भवति । तत्पुरुषप्रमाणेऽवदध्यादिति । अपरमग्निक्षेत्रे समसिते पुरुषप्रमाणे च तत्रावहिते प्रतिपुरुषमष्टाङ्गुलान्यधिकानि भवन्ति ॥ ७ ॥

म०—पुरुषवर्द्धने युक्त्यन्तरमाह—( पुरुषमिति । )

वाशब्दः प्रकारान्तरद्योतकः । अपरम् अग्निक्षेत्रवर्द्धने प्रकारान्तरम् इति एवं कार्य्यम् । तदेवाह-पुरुषं पञ्चमेन भागेनोभयतः पार्श्वमानीतिर्यङ्मान्योरपच्छिद्य वि-भज्य पुरुषं चतुरस्रीकृतम् उभयतः पञ्चधा छित्वा पञ्चविंशतिकोष्ठान् कृत्वा तन्मध्ये पञ्चभागान् समस्य पञ्चकोष्ठान्पञ्चमांशरूपान्समचतुरस्रीकृत्य पञ्चकरण्या चतुरस्रं कृत्वा तृतीयं निर्हृत्य पञ्चकरणीकृतं चतुरस्रं त्रिधा कृत्वा तृतीयं भागं निष्कास्यावशिष्टभाग-द्वयं चतुरस्रीकृत्य पुरुषप्रमाणक्षेत्रे नानाप्रमाणसमासविधिना तदावपेत् सोऽष्टविधादौ पुरुषो भवति ।

अस्मिन्नपि पक्षे पुरुषक्षेत्रस्य पञ्चमे भागे चतुर्विंशत्यङ्गुलविस्तारं विंशतिसहितश-ताङ्गुलदीर्घचतुरस्रं भवति । तस्मात्तृतीयभागे निष्कासिते षोडशाङ्गुलविस्तारं विंश-तिशताङ्गुलदीर्घक्षेत्रं भवतीति तावदेवायाति । तस्य दशमेन पादमात्री पञ्चमेन बृहती-त्यादि अत्रापि समानम् ॥ ७ ॥

---

( १ ) 'तस्य दशमेन' ख० ( २ ) 'पञ्चभागान्' ख०

**पञ्चदशवि(१)भागोऽष्टाङ्गुलम् ॥ ८ ॥**

क०—अष्टाङ्गुलं भवति । उक्तार्थमेतत् ॥ ८ ॥

म०—पुरुषं पञ्चदशभागान् कृत्वेत्यत्र पञ्चदशभागः कियान् भवतीति स्पष्टार्थमाह—( पञ्चेति । )

पुरुषकरण्याः पञ्चदशभागोऽष्टाङ्गुलात्मको भवति तद्द्वयं षोडशाङ्गुलविपुलं विंशतिशताङ्गुलदीर्घं क्षेत्रं तदावापे कृते पुरुषो वर्द्धितो भवति ॥ ८ ॥

**पञ्चारत्निर्दशवितस्तिर्विंशतिशताङ्गुलः (२)पुरुष इत्येतस्माद् द्वादशाङ्गुलं पदमिति च ॥ ९ ॥**

क०—एतदुक्तं भवति । अस्य विंशतिशततमो भागोऽङ्गुलम् । पञ्चमो भागश्चारत्निः । स च चतुर्विंशत्यङ्गुलो भवति । दशमो भागश्च वितस्तिः । स च द्वादशाङ्गुलो भवति । एवं नवविधादिष्वपि ज्ञेयम् ॥ ९ ॥

म०—अरत्निवितस्त्यङ्गुलशब्दानां लोकप्रसिद्धानां मानमाह—( पञ्चेति । )

पुरुषः पञ्चारत्निः । पञ्च अरत्नयो मानमस्य स पञ्चारत्निः । दश वितस्तयो यस्य स दशवितस्तिः । विंशतिशतमङ्गुलानि यस्य स विंशतिशताङ्गुल इति । अरत्न्यादिमानम् एतस्मात् पुरुषात् ज्ञेयम् । पदं च द्वादशाङ्गुलमित्यपि च ज्ञेयम् ।

अयमर्थः—पूर्वं यो वर्द्धितः पुरुषो दर्शितस्तस्य पञ्चदशांशद्वयरूपपुरुषप्रमाणचतुरस्रस्य करणीपञ्चमो भागोऽरत्निः । पुरुषकरणीदशमांशो वितस्तिः । विंशतिशततमो भागोऽङ्गुलम् । पदं च द्वादशाङ्गुलमिति व्यवहारार्थमुक्तम् ॥ ९ ॥

**पुरुषं वा (३)सप्तमेनोभयतोपच्छिद्य सप्तभागान्समस्य सप्तसप्तमभागमङ्गुलं निर्हृत्य पुरुषप्रमाणेऽवदध्यादित्यपरम् ॥ १० ॥**

क०—एवं नव(४)विधादिष्वपि ज्ञेयम् ॥ १० ॥

म०—पुरुषोच्चये तृतीयप्रकारमाह—( पुरुषमिति । )

पुरुषं पुरुषप्रमाणं साधितं समचतुरस्रं सप्तमेन स्वसप्तमांशेनोभयतः पार्श्वद्वये तिर्यङ्मान्योः पार्श्वमान्योश्चापच्छिद्य विभज्य एकोनपञ्चाशत् कोष्ठान् कृत्वा सप्तभागान् समस्य पुरुषसप्तमांशरूपान् सप्तभागान् सप्तकरण्या समचतुरस्रीकृत्य सप्तसप्तमभागमङ्गुलं निर्हृत्य सप्तसप्तमभागेनाङ्गुलसप्तमांशेन सहितमङ्गुलमेकं सप्तभागचतुरस्रादपनीय शेषं चतुरस्रीकृत्य पुरुषप्रमाणेऽवदध्यान्निक्षिपेत् इति अपरं पुरुषोच्चयविधानमिति शेषः ।

अयमर्थः—अङ्गुलसप्तमांशसहित (५)सप्तदशाङ्गुलविस्तारां विंशतिशताङ्गुलदीर्घां भूमिं दीर्घचतुरस्ररूपां समचतुरस्रीकृत्य सप्तमांशसहितमङ्गुलं तस्मात् सप्तभागकृतच-

( १ ) 'पञ्चदशभागो' ख० ( २ ) 'पुरुषो द्वादशाङ्गुलं पदं पुरुषमित्येतस्मात् पुरुषाद्विज्ञेयम्' क० ( ३ ) 'पञ्चमेन' क० ( ४ ) 'द्विविधादि' क० ( ५ ) 'सप्त' नास्ति घ० ।

तुरस्रादपनीय शेषं (१)समचतुरस्रीकृत्य नानाप्रमाणसमासविधिना पुरुषप्रमाणक्षेत्रे आवपेत्, स वर्द्धितसार्द्धसप्तमांशः पुरुष इति । अस्मिन्नपि पक्षे पूर्वप्रकारद्वयोक्तमेवायाति । तथाहि, पुरुषक्षेत्रस्य सप्तमो भागोऽङ्गुलसप्तमभागयुक्तसप्तदशाङ्गुलविस्तारं विंशविंशताङ्गुलदीर्घं क्षेत्रं, तस्मात् ससप्तमभागेऽङ्गुलेऽपनीते षोड़शाङ्गुलविस्तारं विंशति शताङ्गुलदीर्घं क्षेत्रम् अवशिष्यते इति । तस्य दशमेन पादमात्री भवतीत्यत्रापि समम् । नवविधादिष्वपि एवमेव बोध्यम् ॥ १० ॥

**नारत्निवितस्तीनाᳪं समासो विद्यते संख्यायोगादिति श्रुतेः ॥११॥**

क०—तस्य दशमेन पादमात्री भवतीत्येवमादि समानम् । सङ्ख्यायोगो ह्यत्र भवति पञ्चारत्निरित्येवमादि । तच्च प्रतिपुरुषं प्रतिपुरुषमङ्गुलविवृद्ध्यैव सिद्धम् ॥११॥

म०—अधिमानरूपाणाम् अरत्निवितस्तीनां पुरुषे प्रक्षेपो न कार्य्य इत्याह—( नारत्नीति । )

अरत्निवितस्तीनां समासः पुरुषमध्ये प्रक्षेपो नास्ति अधिमानभूता या अरत्निवितस्तयस्तासां पृथग्वर्धनस्योक्तत्वात् पुरुषाणामेव वर्द्धनं नारत्न्यादिसमासेन । "संख्यायोगात्" इतिश्रुतेः । यतोऽष्टानवतिविधे चयने "चतुर्दशारत्नीन् दक्षिणे पक्ष उपदधाति, चतुर्दशोत्तरे चतुर्दशवितस्तीः पुच्छे उपदधाति" इति श्रुत्याऽरत्न्यादिषु वर्द्धनार्थं संख्यायोगः पृथगुच्यते । अतः सप्तविध एकविंशतिविधोऽष्टानवतिविध एकशतविध इति पुंसामेवोच्चयो नारत्न्यादिसमासेनेत्यर्थः ॥ ११ ॥

इति शौल्वे विवरणे महीधरविनिर्मिते समुच्चयस्य कथनं नाम
पञ्चमी कण्डिकाऽगमत् ॥ ५ ॥

## अथ षष्ठी कण्डिका ।

**यथाग्नि वेदीष्टकाप्रमाणं वर्द्धत इत्येतद्वक्ष्यामः ॥ १ ॥**

क०—यथा पुरुषोच्चयादग्निमानं वर्द्धते एवं वेदीष्टकाप्रमाणमपि वर्द्धते । न हि वेदिविवृद्धिमन्तरेण पुरुषोच्चयादग्निमानं भवति । न चेष्टकाविवृद्ध्या विना पुरुषोच्चयक्षेत्रं पूर्यते इति । तेन यथा पुरुषोच्चयस्तथा वृद्धिः । प्रतिपुरुषं प्रक्रमसप्तमभागविवृद्धिस्तदिदं ग्रन्थकारेणोच्यते ॥ १ ॥

म०—पुरुषोच्चये वेदेरिष्टकानां चोच्चयो विधेयस्तद्वक्तुं प्रतिजानीते-( यथेति । )

'यथाऽग्नि वेदीष्टकाप्रमाणं वर्द्धते' इति कल्पकारेणोक्तं, तद् वक्ष्यामः वृद्धिप्रकारं कथयिष्यामः । कल्पसूत्रार्थस्त्वयं-वेदिश्च इष्टकाश्च वेदीष्टकाः, तासां प्रमाणं यथाग्नि भवति, अग्निमनतिक्रम्य यथाग्नि । अयमर्थः-अग्निक्षेत्रप्रमाणं यथा वर्द्धते तथा

(१) 'सम' नास्ति ष० ।

वेदिप्रमाणमिष्टकाप्रमाणं च वर्द्धत इति । वेदिवृद्धिं विना वर्द्धितस्याग्नेर्मानासम्भवात् । अवर्द्धिताश्चेष्टका वर्द्धितमग्निक्षेत्रं न पूरयन्तीति वेदेरिष्टकानां च यथाग्नि वर्द्धनं भवति । तत्र "तस्य दशमेन पादमात्री" ( शु० सू० ९-६ ) इत्यादिनेष्टकावृद्धि-रुक्तैव । अत्र पुनरिष्टकाग्रहणं कल्पसूत्रानुवादात् ॥ १ ॥

**या करणी चतुर्दशप्रक्रमान्सङ्क्षिपति त्रींश्च प्रक्रमस(१)प्तमभागा-न्त्स एकशतविधे प्रक्रमः ॥ २ ॥**

क०—एवं प्रतिपुरुषं प्रक्रमसप्तभागविवृद्ध्या वृद्धिर्भवति । तथा च सूत्रम्—"एकशतं प्रक्रमसप्तमभागाः प्रक्रमाः" ॥ २ ॥

म०—वेदिवर्द्धनं प्रक्रमकथनेनैव भवतीति चरमे चयने प्रक्रममाह-(या करणीति ।) या करणी चतुर्दशप्रक्रमान् तथा प्रक्रमस्य त्रीन् सप्तमभागान् संक्षिपति समचतुरस्त्रीकरोति, स एकशतविधचयने प्रक्रमो भवति ।

अयमर्थः—त्रिपदकरणीकसमचतुरस्रस्य यः सप्तमोऽशः षट्त्रिंशदङ्गुलायामोऽङ्गुल-सप्तमांशसहितपञ्चाङ्गुलविस्तारो भूभागः, स त्रिगुणः कृतः पञ्चदशाङ्गुलानि त्रिसप्त-मभागयुतानि विस्तारे, षट्त्रिंशदङ्गुलान्यायामे च भवति, तं चतुरस्त्रीकृत्य या करणी चतुर्दशगुणं त्रिपदकरणीकं संक्षिपति, तत्करणीके चतुरस्रे नानाप्रमाणसमासविधिना सं क्षिपेव, तत्क्षेत्रस्य करणी एकशतविधचयने प्रक्रमवाच्या । तेन प्रक्रमेण प्रकृतिवद्वेदिः साध्या । स चान्तिमचयनप्रक्रमः किञ्चिदूनसप्तत्रिंशदधिकशताङ्गुलप्रमितो भवति ।

तच्चैवं विधेयम्—पूर्वमग्निक्षेत्रं सार्द्धसप्तपुरुषात्मकं समचतुरस्त्रीकृतं स्वसप्तमभागेन द्वितीयचयने वर्द्धयेत् । एवं तृतीयादिष्वपि एकैकोच्चयेन स्वसप्तमभागवृद्धिः, तृतीये द्वौ सप्तमभागावधिकौ । चतुर्थे त्रयः । पञ्चमे चत्वारः(२) । (३)( षष्ठे पञ्च । सप्तमे षट् । अष्टमे प्रथमक्षेत्रस्य द्विकरणी । एवं क्रमेण पञ्चनवतितमे चयने चतुर्नवतिः सप्तभागा वर्द्धन्ते ।

तत्साधनोपायस्तु प्रथमचयने यथा प्रमाणेन पृथक् चतुर्दश चतुरस्राणि संसाध्य तानि नानाप्रमाणसमासविधिनैकीकृत्य तच्चतुर्दशकरणीकमेकं चतुरस्रं साधयेत । ततः पद्याप्रमाणक्षेत्रं सप्तधा विभज्य तस्य त्रीन् भागान् समस्य चतुरस्रं कृत्वा तत्सप्तम-भागत्रयसाधितं चतुरस्रं चतुर्दशकरणीके चतुरस्रे नानाप्रमाणसमासविधिना आवपेत् । तदावापे कृते यावच्चतुरस्रं जायते सैकशतविधे पद्या । दशभिस्ताभिः पद्याभिर्दक्षिणोत्तरं पूर्वापरं वा पङ्क्त्या स्थापिताभिरेकः पुरुषः । एवंविधेन पुरुषेण "द्विपुरुषाꣳ रज्जुं मित्वा" ( का० श्रौ० १६-२-१ ) इत्यादि कल्पोक्तविधिनाऽऽत्मपक्षपुच्छादिकं साध्यम् । एवंविधाभिस्तिसृभिः पद्याभिः पूर्वापरस्थापिताभिरेकः प्रक्रम इति ) ॥२॥

( १ ) 'सप्तभागान्' ख० ( २ ) 'चत्वार इत्याद्युद्धनीयम्' घ० ।
( ३ ) कंसान्तर्गतं नास्ति घ० ।

**द्वितीये वा सप्तसु प्रक्रमेषु प्रक्रममवधाय तस्य सप्तमभागेन प्रक्रमार्थः ॥ ३ ॥**

क०—द्वितीयादिषु वा सप्तसु प्रक्रमेषु प्रक्रममवदधाति तस्य सप्तमभागेन प्रक्रमार्थः ॥ ३ ॥

म०—द्वितीये चयने प्रक्रममाह—( द्वितीये इति । )

वाऽवधारणार्थः । द्वितीयेऽष्टविधेऽग्नौ सप्तसु प्रक्रमेषु एकं प्रक्रममवधाय प्रक्षिप्य तादृशस्य प्रक्रमस्य सप्तमभागेन प्रक्रमार्थः कार्य्यः ।

अयमर्थः—त्रिपदप्रक्रमप्रमाणानि सप्त समचतुरस्राणि समस्यैकं चतुरस्रं कृत्वा तत्र त्रिपदप्रक्रमचतुरस्रमावपेत् । ततस्तस्य वर्द्धितक्षेत्रस्य यः सप्तमो भागस्तं समचतुरस्रीकृत्य तस्य करण्या प्रक्रमकार्यं द्वितीये चयने विधेयम् ॥ ३ ॥

**प्रक्रमेण वा सप्तमभागेन (१)प्रक्रमार्थः ॥ ४ ॥**

म०—एवमपि प्रक्रमसप्तमांशवृद्धिः कथिता । प्रकारान्तरमाह—( प्रक्रमेणेति । )

यद्वा सप्तमभागसहितेन प्रक्रमेण प्रक्रमकार्यं द्वितीये चयने कार्य्यम् ।

अयमर्थः—एकमेव त्रिपदप्रक्रमक्षेत्रं सप्तधा विभज्य स्वसप्तमभागं चतुरस्रीकृत्य प्रक्रमक्षेत्रे आवपेत नानाप्रमाणसमासविधिना । ततः सप्तमांशाधिकप्रक्रमक्षेत्रकृतकरण्या द्वितीये चयने प्रक्रमकार्यं कर्त्तव्यम् । नवविधे तृतीयचयने प्रक्रमक्षेत्रस्य द्वौ सप्तमभागौ प्रक्रमक्षेत्रमध्ये प्रक्षेप्यौ । चतुर्थे त्रयः, पञ्चमे चत्वारः, (२)(षष्ठे पञ्च, सप्तमे षट्, अष्टमे चयने प्रक्रमक्षेत्रद्विकरण्या प्रक्रममानम्) इत्याद्यूह्यम् । यद्वा, तृतीये चयने प्रक्रमक्षेत्रद्विकरण्या समचतुरस्रं कृत्वा तस्य सप्तमो भागः प्रथमचयनप्रक्रमक्षेत्रमध्ये आवपनीयः । चतुर्थे त्रिकरण्या साधितस्य सप्तमो (३)भागः । (४)( पञ्चमे चतुःकरण्या साधितस्य सप्तमः । षष्ठे पञ्चकरण्या साधितस्य सप्तमः । सप्तमे षट्करण्या साधितस्य सप्तमः । अष्टमे प्रक्रमद्विकरण्यैव प्रक्रमकार्यमित्यादि ) ॥ ४ ॥

**(५)एवमैकशतविधात् ॥ ५ ॥**

म०—एकशतविधाच्चयनात् आ एकशतविधचयनपर्यन्तम् एवमेवाभ्यस्तसप्तमांशवृद्धिः प्रक्रमे द्रष्टव्या चतुर्नवतिसप्तमांशेषु प्रक्रमे क्षिप्तेषु एकशतविधे प्रक्रमो भवति॥५॥

**नान्तःपात्यगार्हपत्ययोर्वृद्धिर्भवति तावदेव योनिर्भवति न वै जातं गर्भं योनिरनुवर्धत इति श्रुतेर्वृद्धेरत्यन्तं प्रतिषेधः ॥ ६ ॥**

म०—अन्तःपात्यगार्हपत्ययोर्वृद्धिं प्रतिषेधति—( नान्तःपेति । )

अन्तःपात्यगार्हपत्ययोर्वृद्धिर्न भवति । उक्थाग्निस्थाने कृता व्याममात्रविस्तारा

---

( १ ) 'प्रक्रमार्थः' भाष्यांशो न तु सूत्रांशः 'क' पुस्तके । ( २ ) कंसान्तर्गतं नास्ति घ० ।
( ३ ) 'भाग इत्यादि' घ० । ( ४ ) कंसान्तर्गतं नास्ति घ० ।
( ५ ) पञ्चमषष्ठसप्तमसूत्राणि मिलित्वैकमेवसूत्रं 'क' पुस्तके ।

मण्डलाकारा गार्हपत्यशब्देनोच्यते । तस्मात्पूर्वभागे वेद्यन्तपर्यन्तं प्रक्रमत्रयपरिमितो भूभागोऽन्तःपात्यः । अत्र त्रिपदः प्रक्रमः । तयोर्द्वितीयादिचयनेषु अग्निक्षेत्रवेदीष्टकावद् वृद्धिः प्राप्ता सा निषिध्यते । कुतः ? तावदेव योनिर्भवति । अन्तःपात्यसहिता गार्हपत्या चितिः श्रुतावग्नेर्योनित्वेनोक्ता, तावत्क्षेत्रं योनिर्भवति । भवति योनिस्तथापि वृद्धिः कथं वार्यत इत्यत आह—"नवै जातं गर्भं योनिरनुवर्द्धते" इति श्रुतेः । जातं गर्भम् अनु गर्भोत्पत्तेः पश्चाद् योनिर्न वर्द्धते । यावद्योनौ गर्भः स्थितस्तावद्गर्भवृद्ध्यनुसारेण योनिर्वर्द्धते । गर्भोत्पत्त्यनन्तरं गर्भ एव वर्द्धते न योनिरिति श्रुत्योक्तत्वात् । अन्तःपात्यगार्हपत्यचित्योरत्यन्तं वृद्धेः प्रतिषेधः । एवं शुल्बकारेणात्र तयोर्वृद्धिः प्रतिषिद्धा । कल्पकारेण तु "अन्तःपात्यगार्हपत्ययोरिच्छन्" ( का० श्रौ० १६-८-२९ ) इति विकल्प एवोक्तः । श्रुतावपि विहितप्रतिषिद्धत्वाद्विकल्पोऽवभासते ॥ ६ ॥

## यावत्प्रमाणानि समचतुरस्राण्येकीकर्त्तुं चिकीर्षेदेकोनानि तानि भवन्ति तिर्यग्द्विगुणान्येकत एकाधिकानि त्र्यस्रिर्भवति तस्येषुस्तत्करोति ॥ ७ ॥

क०—यावद्भिः प्रमाणैश्चतुरस्रं कर्त्तुमिच्छति तावदेकोनं द्विगुणीक्रियते तत्तिर्यङ्मानी तावदेकाधिकं चैकतोन्यतोपीति त्र्यस्रिर्भवति तस्येष्टचतुरस्रीकृता तावत्सङ्क्षिपति । चतुरस्रं यावद्भिः प्रमाणैः कर्त्तुमीप्सते एकोनद्विगुणीकृतैस्तै रज्जुरेकाधिका नित्र्यस्रीकृतेषु तस्य सामग्र्यं तत्तत्संक्षेपको भवेदिति । एकोनानि तिर्यग्द्विगुणान्येकाधिकानि कर्त्तुमिच्छति तत्परिच्छेदिका रज्जुर्द्विगुणीक्रियते तद्वेदिमानं यद् द्वादशाङ्गुलं पुरस्तादपच्छिद्यत्येवमादिभिर्भवति । यतस्त्र्यस्रिचतुरस्रीकृतेषु यावन्तः सङ्क्षिपति चतुरस्रं तु यावद्भिः प्रमाणैः कर्त्तुमिष्यते एकोनद्विगुणितैस्तु रज्जुरेकाधिकमिता त्र्यस्रीकृतेषु तस्यायामस्य तत्सङ्क्षेपको भवेदिति इषुकरणी प्रोक्ता शुल्बकारेण चोदिता ॥ ७ ॥

म०—अनेकचतुरस्रसमास उक्तस्तथापि तत्करणे प्रकारान्तरमाह—( यावदिति । )

यावत्प्रमाणानि यावत्संख्याकानि समचतुरस्राणि सममानानि एकीकर्त्तुं चिकीर्षेत् समसितुमिच्छेत् । एकोनानि तानि एकरहितसंख्याकानि तानि द्विगुणानि सन्ति तिर्य्यक् भवन्ति एकहीनतच्चतुरस्राणां द्विगुणानां पङ्क्तिस्थापितानां मध्यसूत्रमधस्तिर्य्यङ्मानी कर्त्तव्येत्यर्थः । एकाधिकानि तानि एकतः एकाधिकतावत्संख्यपङ्क्तिस्थापितचतुरस्रमध्यसूत्रमेकतोऽन्यतश्च तिर्य्यङ्मान्यन्तद्वयादारभ्योपरि अस्रिप्रदेशो यथा भवति, कोणं यथा स्यात्तथा भुजद्वयत्वेनोपरि मिलिताग्रद्वयं स्थापनीयं तस्येषुः शरः तत् करोति तावत्संख्याकचतुरस्रसमासं करोति क्षेत्रफलेन । तस्य त्रिकोणस्य शरो नामोर्ध्वकोणमारभ्याधस्तिर्य्यङ्मानीमध्यपर्य्यन्तस्थापितलम्बसूत्रार्द्धं सिद्धमित्यर्थः ॥ ७ ॥

## यथायूपं वेदिवर्द्धनमित्येतद्वक्ष्यामः ॥ ८ ॥

क०—एतच्च रथाक्षप्रमाणान्तरालपक्षे भवति ॥ ८ ॥

म०—यूपैकादशिन्यां वेदिवर्धनं वक्तुं प्रतिजानीते—( यथेति । )

"यथायूपं वेदिवर्द्धनम्" ( का० श्रौ० ८-८-२१ ) इति यत्कल्पकारेणोक्तं तद्वक्ष्यामः वेदिवर्द्धनविधिं कथयिष्यामः। यथायूपं यथा यूपान्तरालानि रथाक्षमात्राणि तथा वेदिवर्द्धनं विधेयं यूपैकादशिनी चेद्रथाक्षमात्राण्यन्तराणि पूर्वार्द्धं वा समं विभज्येति यत्कल्पकारेण ज्योतिष्टोमे यूपैकादशिनीपक्षे उक्तः ( एकादशानां वर्ग एकादशिनी । ) तत्रैकादशयूपस्थापने पक्षद्वयमुक्तम् । यूपानामेकादशिनी चेत्प्रतियूपं रथाक्षमात्राणि अन्तरालानि मुक्त्वा यूपान्तरस्थापनम्, इत्येकः पक्षः । यद्वा पूर्वार्द्धं प्राकृतप्रमाणवेदेरेव पूर्वभागं एकादशधा विभज्यैकादशयूपान्निखनेदित्यपरः पक्षः । तत्र पूर्वार्द्धसमविभागपक्षे वेदिवृद्धिर्न स्यात् । यूपानां रथाक्षमात्रान्तरालपक्षे वेदिवृद्धिरवश्यमपेक्षिता । अन्यथा अन्तर्वेदि मिनोत्ययमर्थो विहितो न स्यात् ॥ ८ ॥

**या रज्जुरेकादशोपरवान्सङ्क्षिपति दश च रथाक्षांस्तस्या यश्चतुर्विंशो भागः स प्रक्रमः ॥ ९ ॥(१)**

म०—एवं प्रतिज्ञाय वेदिवृद्धिमाह—( या रज्जुरिति । )

या रज्जुरेकादशसंख्याकानुपरवान् यूपखननार्थं गर्त्तान् द्वादशाङ्गुलप्रमाणान् तथा दशरथाक्षान् दशसंख्याकानि रथाक्षमात्राणि चतुरधिकशताङ्गुलमितान्यन्तरालानि च संक्षिपति मिनोति एतावदायता रज्जुः सा च विंशत्यङ्गुलाधिकाष्टचत्वारिंशदरत्निमिता भवति तस्या यश्चतुर्विंशो भागः तृतीयभागसहितमेकमर्द्धाङ्गुलं द्वावरत्नी च स प्रक्रमः यूपैकादशिन्यामेतावत्प्रक्रमप्रमाणमित्यर्थः ॥ ९ ॥

**(२)तेन वेदिं निर्माय (३)द्वादशाङ्गुलं पुरस्तादपच्छिद्य तद्यूपावट्याच्छङ्कोः पुरस्तात्प्राञ्चमवधाय तस्मिन्यूपान्मिनोति ॥ १० ॥**

म०—तेन वेदिमानङ्कुर्यादित्याह—( तेनेति । )

तेन पूर्वोक्तेन प्रक्रमेण वेदिं निर्माय षड्विंशप्रक्रमा प्राचीत्यादिविधिना वेदिं कृत्वा पुरस्ताद्वेदेः पूर्वभागे द्वादशाङ्गुलम् अपच्छिद्य द्वादशाङ्गुलप्रमाणविस्तारं दक्षिणोत्तरयोस्तु द्वासप्तत्यधिकैकादशशताङ्गुलायतं वेद्यंशं, यूपावट्यशङ्कोर्वेद्यैलद्वयाच्च द्वादशाङ्गुलसूत्रस्याधस्ताद्दानेन तावन्तं वेदिपूर्वभागं छित्त्वा तं छिन्नं वेदिभागं यूपावट्यात् यूपस्यावटे गर्त्ते भवो यूपावट्यः तस्माच्छङ्कोः कीलात् प्राञ्चमवधाय पूर्वापरायतं कृत्वा वेदौ शिष्टायां संयोज्य तस्मिन् छित्त्वा पूर्वापरयोजिते वेदिभागे यूपान् मिनोति एकादशगर्त्तेषु रथाक्षमानान्तरालेषु प्रक्षिपेत इति पूर्वपक्षः ॥ १० ॥

( १ ) अष्टमनवमसूत्रे मिलित्वैकमेव सूत्रं 'क' पुस्तके ।

( २ ) "तेन वेदिमिथुनं यावत्" इति 'क' पुस्तके पृथक् सूत्रम् ।

( ३ ) 'यद् द्वादशा' क० ।

## पार्श्वयोर्वाऽर्धमन्तर्वेदीति श्रुतेरर्द्धकानिति ॥ ११ ॥

म०—सिद्धान्तमाह—( पार्श्वयोरिति ) ।

वा शब्दः पूर्वपक्षनिवृत्त्यै पार्श्वयोर्यूपावट्यशङ्कोर्दक्षिणोत्तरभागयोरुत्तरदक्षिणभागयोर्वा अर्द्धकान् अर्द्धानर्द्धान् पञ्च पञ्चसंख्यकान् एकैकक्रमेण यूपान् मिनोति । प्रक्षिपतीति शेषः । अर्द्धकानित्युक्तेर्यूपावटे प्रथमोऽर्थसिद्धः । अयमर्थः—मध्यमं परिलिख्योत्तरं दक्षिणं वा व्यत्यासमितरानिति कल्पकारोक्तेः प्रथमं मध्यमं यूपं निखाय तस्मादुत्तरं द्वितीयं मध्याद्दक्षिणं तृतीयं द्वितीयादुत्तरं चतुर्थं तृतीयाद्दक्षिणं पञ्चमं चतुर्थादुत्तरं षष्ठं पञ्चमाद्दक्षिणं सप्तमं षष्ठादुत्तरमष्टमं सप्तमाद्दक्षिणं नवमम् अष्टमादुत्तरं दशमं नवमाद्दक्षिणमेकादशमिति । दक्षिणवेदिपक्षे मध्यमं निखाय तस्माद्दक्षिणं द्वितीयं मध्यमादुत्तरं तृतीयं द्वितीयाद्दक्षिणं चतुर्थं तृतीयादुत्तरं पञ्चमं चतुर्थाद्दक्षिणं षष्ठं पञ्चमादुत्तरं सप्तमं षष्ठाद्दक्षिणमष्टमं सप्तमादुत्तरं नवमम् अष्टमाद्दक्षिणं दशमं नवमादुत्तरमेकादशमिति । एवमुदीचीयूपपङ्क्तिः कथं विधेयेति चेदत आह—"अर्द्धमन्तर्वेदि" इतिश्रुतेः "अर्द्धमन्तर्वेदि मिनोत्यर्द्धं बहिर्वेदि" इति श्रुतेर्द्वादशाङ्गुला गर्त्तास्तथा विधेया यथा गर्त्तार्द्धं वेद्यामायाति गर्त्तार्द्धमपरं बहिः । एवञ्च कृते वेदिवर्द्धनमपि सार्थकं यूपानां वेदिस्पर्शश्च । गर्त्ता अपि पूर्वमनेनैव क्रमेण विधेयाः, यूपाश्च दक्षिणं यूपमारभ्यैकैकारत्निहीनाः कार्य्याः "दक्षिणः षड्विंशत्यरत्निः वर्षिष्ठो दक्षिणोनुपूर्व्यं इतर" इत्युक्तेः । पूर्वपक्षसूत्रे कथिता प्राचीयूपपङ्क्तिस्तु तीव्रसुतियागे ज्ञेया । तत्राग्निष्टोमयूपो वर्षिष्ठो भवति वेद्यपच्छेदश्च न स्याद्वेदिसम्बन्धोऽग्निष्टोमस्यैवेति ॥ ११ ॥

## एके प्रथमोत्तमौ प्रकृतिवत् ॥ १२ ॥(१)

क०—या रज्जुरेकादशोपरवान्सङ्क्षिपति दश च रथाक्षानित्यादि रज्जुः ॥ १२ ॥

म०—मतान्तरमाह—( एक इति । )

एके आचार्य्याः प्रथमोत्तमौ आद्यान्तौ यूपौ प्रकृतिवदिच्छन्ति । प्रकृतौ स्तोमायने यथैक एव यूपो वेदिमध्यगतार्द्धः, तथा यूपैकादशिन्याम् आद्यान्तौ यूपौ वेदिगतौ द्वावेवान्ये बहिर्वेदीति तस्माद्विकल्पः ॥ १२ ॥

## सैषा शिखण्डिनी वेदिः ॥ १३ ॥

क०—भवति ।

एतच्च रथाक्षान्तरालपक्षे भवति । तेन वेदिद्वादशाङ्गुलं पुरस्तादपच्छिद्येत्येवमादिर्भवति । न हि वेदियूपयोरङ्गाङ्गिलक्षणः संयोग इति सिद्धम् ॥ १३ ॥

---

( १ ) 'द्वादशाङ्गुलम्' इत्यारभ्य दशमसूत्रम् एकादशद्वादशसूत्रे च मिलित्वैकमेव सूत्रं 'क' पुस्तके वर्तते ।

म०—वर्द्धितावर्द्धितयूपैकादशिनीवेदेर्नामान्याह—( सैषेति । )

सा एषा यूपैकादशिनीयुक्ता वेदिर्वर्द्धिताप्यवर्द्धितापि शिखण्डिनीत्युच्यते । शिखण्डा इव शिखण्डा मयूरकलापाकारा यूपा यस्याः सा शिखण्डिनी । एकादशयूपानां पूर्वस्थितानां शिखण्डाकारदृतयाऽवभासमानत्वादेषा वेदिः पश्चिमाभिमुखोर्द्धवकलापनृत्यन्मयूरसदृशत्वात् शिखण्डिनीति नाम्नोच्यते ॥ १३ ॥

क०—भवन्ति चात्र श्लोकाः—

द्विहस्ते लक्षणं कुर्यात्त्रिहस्तो मध्यमः शिरः ।
शिरःपश्चाद्वितस्तिः स्यात्पूर्वार्धं हस्त एव च ॥ १ ॥
सार्धहस्ते च पाशः स्याद्वेदिः स्यात्पौर्णमासिकी ।
सङ्ख्याज्ञः परिमाणज्ञः समसूत्रनिरञ्छकः ॥ २ ॥
समभूमौ भवेद्विद्वाञ्छुल्बवित्परिपृच्छकः ।
न जलात्सममन्यत्स्यान्नान्यद्वातात्प्रमा भवेत् ॥ ३ ॥
नान्यद्दूरं भ्रमादूर्ध्वं नान्यत्सूत्रादृजुर्भवेत् ।
तिर्यङ्मान्याश्च सर्वार्थैः पार्श्वमान्याश्च योगवित् ॥ ४ ॥
करणीनां विभागज्ञो नित्योद्युक्तश्च कर्मसु ।
शास्त्रबुद्ध्या विभागज्ञः परशास्त्रकुतूहलः ॥ ५ ॥
शिल्पिभ्यः स्थपतिभ्यश्च आददीत मतीः सदा ।
षडङ्गुलपरीणाहं द्वादशाङ्गुलमुच्छ्रितम् ॥ ६ ॥
जरठं चाव्रणं चैव शङ्कुं कुर्याद्विशेषतः ।
द्विवितस्तिप्रमाणस्तु खादिरो मुद्गरस्तथा ॥ ७ ॥
शङ्कुस्तेन निखातव्यस्तस्मात्तस्य परिग्रहः ।
एकतस्तु ऋजुस्तीक्ष्णः खादिरः सममायतः ॥ ८ ॥
शङ्कुः कार्यस्तु शुल्बज्ञैस्तस्यार्धं गमयेन्महीम् ।
प्रादेशमात्रो हविर्यज्ञे पूर्वलक्षणलक्षितः ॥ ९ ॥
शङ्कुरामशिराः कार्यस्तस्याऽप्यर्धं निखापयेत् ।
चतुरस्रं मुद्गरं स्यात् षोडशाङ्गुलमायतम् ॥ १० ॥
अविद्धं (१)रमणीयं च दारुमध्याच्च निर्मितम् ।
अजीर्णा ग्रन्थिनी सूक्ष्मा समा श्लक्ष्णा त्वरोमशा ॥ ११ ॥
रज्जुर्मानाधिका कार्या अध्वरे योगमिच्छता ।
शाणी वा बाल्वजी चैव वैणवी वा विधीयते ॥ १२ ॥
रज्जुस्तूभयतः पाशा त्रिवृता यज्ञकर्मणि ।
रज्जुर्मुञ्जमयी कार्या शणैस्तु परिमिश्रिता ॥ १३ ॥

---

( १ ) क्रमणीयं 'क' पुस्तके ।

कात्यायनो वदत्येवमखण्डा कुशवल्वजैः ।
नवके लक्षणं कुर्यात्त्रीणि कुर्यात्त्रिपु त्रिपु ॥ १४ ॥
उत्तमो नवकः पाशः सदसो मानमुच्यते ।
पञ्चदशमथैकविंशतिकमपरं परतस्त्रिकं च ॥ १५ ॥
द्वादशसु पाश उत्तम इति सोमे रज्जुमानमेतत् ।
पदस्याक्ष्णया तिरश्ची तयोरक्षणया भवेत् ॥ १६ ॥
सौत्रामण्यां मिमातव्या वेदिः स्यात्सोमवत्तथा ।
नीहारेण घनैर्वापि ज्योतिषामभ्रदर्शने ॥ १७ ॥
अप्सु दीपं प्रगृह्णीयाद्यावत्तमसि दर्शने ।
प्रमाणं च प्रमेयं च यच्चान्यद्वस्तु संज्ञकम् ॥ १८ ॥
सर्वं तच्छास्त्रतो ज्ञात्वा यज्ञे सिद्ध्यन्ति याज्ञिकाः ।
यथा न क्षीयते मानं यथा च न विवर्धते ॥ १९ ॥
यथा च रमते दृष्टिस्तथा योगं समाचरेत ।
अरत्निश्चतुरस्रस्तु पूर्वस्याग्नेः खरो भवेत् ॥ २० ॥
रथचक्राकृतिः पश्चाच्चन्द्रार्ध इव दक्षिणः ।
अग्नीनां तु खरः कार्यो मेखलात्रयसंयुतः ॥ २१ ॥
द्वादशाङ्गुल उच्छ्राये विस्तारे चतुरङ्गुलः ।
तन्तुः पुष्करनालस्य षड्गुणः परिवेष्टितः ॥ २२ ॥
वत्सतर्यास्त्रिहायण्या वालेन सदृशो भवेत ।
त्रयस्त्रिहायणीबालाः सर्षपार्धं प्रचक्षते ॥ २३ ॥
द्विगुणं सर्षपं विद्याद्यवः पञ्च तु सर्षपाः ।
अङ्गुलस्य प्रमाणं तु षड्यवाः पार्श्वसंस्थिताः ॥ २४ ॥
चतुर्विंशाङ्गुलोऽरत्निर्वितस्तिर्द्वादशाङ्गुला ।
व्यासस्यात्र प्रमाणं तु चतुर्न्यूनं शतं भवेत् ॥ २५ ॥
पुरुषस्य प्रमाणं वै विंशतिस्तु शताधिका ।
हिरण्यशकलार्थं तु हिरण्यं यस्य नोच्यते ॥ २६ ॥
कृष्णलेनैव तद्व्याख्या यज्ञे सिध्यति याज्ञिकी ।
कृष्णलं त्रियवं मानं ताम्रायसमतः परम् ॥ २७ ॥
सुवर्णादूर्ध्वं च माषाणां सुवर्णाश्च त्रिसप्ततिः ।
त्रीणि चैव सहस्राणि दद्याद्बहुसुवर्णके ॥ २८ ॥
भूयः स्थपतितो ज्ञात्वा संज्ञास्वन्यासु मानवित् ।
स्वर्णकारो यथाऽभ्यासात्तथा भूयो विवर्द्धते ॥ २९ ॥
ह्रसते शोपपाकाभ्यां द्वात्रिंशद्भागमिष्टका ।

तस्मादार्द्रप्रमाणं तु कुर्यान्मानाधिकं बुधः ॥ ३० ॥
अज्ञात्वा शुल्वसद्भावं यज्ञे सौत्रामणीसुते ।
वेदिं ये कर्त्तुमिच्छन्ति गिरिं भिन्दन्ति ते नखैः ॥ ३१ ॥
दण्डरज्ज्वर्धमभ्यस्य षष्ठे त्वर्धस्य लक्षणम् ।
तथैव चेतरत्रापि तिर्यङ्मानं यदृच्छया ॥ ३२ ॥
यावत्प्रमाणा रज्जुः स्यात्तावानेवागमो भवेत् ।
आगमार्धे भवेच्छङ्कुस्तदर्धे च निरञ्छनम् ॥ ३३ ॥
आधाने पदिकं कुर्यात् द्विपदः सौमिको भवेत् ।
अग्नौ च त्रिपदं कुर्यात्प्रक्रमं याज्ञिको बुधः ॥ ३४ ॥
कृत्तिका श्रवणः पुष्यश्चित्रास्वात्योर्यदन्तरम् ।
एतत्प्राच्या दिशो रूपं युगमात्रोदिते पुरः ॥ ३५ ॥
पञ्चाशच्छर्कराः पश्चात्पूर्वे देयास्त्रिसप्ततिः ।
दक्षिणे तु प्रदातव्या दशपञ्च च सप्त च ॥ ३६ ॥
शंस्यश्चतुर्विंशतिपार्श्वभागश्चतुर्दशभिः परिलेख्यस्तुनर्यम् ।
तथैव चाष्टद्विगुणैरथर्य्यस्त्रिंशद्भिरायम्य हरेत्तृतीयम् ॥ ३७ ॥
अग्नेरुदक्सादूर्धनवाङ्गुले मध्यं ततो लिखेत् ।
वृत्तमेकोनविंशत्या प्राचीज्या मध्यगा भवेत् ॥ ३८ ॥
उदगदूर्धं विहायार्वाक् खरोऽग्नेर्दक्षिणस्य तु ।
सूत्रदोषदरिद्रस्य गूढमन्त्रस्य धीमतः ॥ ३९ ॥
समाप्तेयं क्रिया शौल्बी कात्यायनमहात्मनः ॥ ४० ॥

**इति श्रीउपाध्यायकर्ककृतौ कात्यायनशुल्वभाष्यं सम्पूर्णम् ।**

म०—भवन्ति चात्र श्लोकाः । अत्र सूत्रोक्तेऽर्थे श्लोका अपि केचन विद्यन्ते शुल्बकारकृता एव । तत्र ग्रन्थाधिकारिनिरूपणाय श्लोकाः—

संख्याज्ञः परिमाणज्ञः समसूत्रनिरञ्छकः ।
समभूमौ भवेद्विद्वाञ्छुल्ववित् परिपृच्छकः ॥ १ ॥
शास्त्रबुद्धिविभागज्ञः परशास्त्रकुतूहलः ।
शिल्पिभ्यः स्थपतिभ्यश्चाप्याददीत मतीः सदा ॥ २ ॥
तिर्य्यङ्मान्याश्च सर्वार्थैः पार्श्वमान्याश्च योगवित् ।
करणीनां विभागज्ञो नित्योद्युक्तश्च सर्वदा ॥ ३ ॥

तथा भूसमत्वाद्युपायः—

न जलात्सममन्यत्तु नान्यद्वृत्तात्प्रमा भवेत् ।
नान्यद्दूरं भ्रमादूर्ध्वं नान्यत्सूत्रादृजुर्भवेत् ॥ ४ ॥

शङ्कुलक्षणम्—

षडङ्गुलपरीणाहं द्वादशाङ्गुलमुच्छ्रितम्।
जरठश्चाव्रणञ्चैव शङ्कुं कुर्य्याद्विशेषतः॥ ५॥
एकतश्च ऋजुस्तीक्ष्णः खादिरः सममायतः।
शङ्कुः कार्य्यस्तु शुल्वज्ञैस्तस्यादूर्ध्वं गमयेन्महीम्॥ ६॥
प्रादेशमात्रो हविर्यज्ञे पूर्वलक्षणलक्षितः।
शङ्कुरामशिराः कार्य्यस्तस्याप्यदूर्ध्वं निखातयेत्॥ ७॥

आमशिराः—अशुष्कशिराः। मुद्गरलक्षणम्—

द्विवितस्तिप्रमाणस्तु खादिरो मुद्गरो भवेत्।
शङ्कुस्तेन निखेयः स्यात्तस्मात्तस्य परिग्रहः॥ ८॥
मुद्गरं चतुरस्रं स्यात् षोडशाङ्गुलमायतम्।
प्रमध्यविदूर्धं रमणं दारुमध्याच्च निर्म्मितम्॥ ९॥

रज्जुलक्षणम्—

अजीर्णा ग्रन्थिनी सूक्ष्मा समा श्लक्ष्णा त्वरोमशा।
रज्जुर्मानाधिका कार्य्या अध्वरे योगमिच्छता॥ १०॥
शाणी वा बाल्वजी वापि वैणवी वा विधीयते।
रज्जुश्चोभयतः पाशा त्रिवृता यज्ञकर्म्मणि॥ ११॥
रज्जुर्मुञ्जमयी कार्य्या शणैस्तु परिमिश्रिता।
कात्यायनो वदत्येवमखण्डा कुशबल्वजैः॥ १२॥

शङ्कुसमीकरणम्—

शङ्कुस्त्र्यंशश्चतुर्भागवृत्तार्द्धं पञ्चभागिकाः।
शलाकादत्तदिग्भ्योऽग्नेः शङ्कग्रमृजुपाति तु॥ १३॥

प्राचीज्ञानायाह—

कृत्तिका श्रवणः पुष्यः चित्रास्वात्योर्यदन्तरम्।
एतत्प्राच्या दिशो रूपं युगमात्रोदिते पुरः॥ १४॥

चतुरस्रसाधनम्—

यावत्प्रमाणा रज्जुः स्यात्तावानेवागमो भवेत्।
आगमार्द्धं भवेच्छङ्कुस्तदर्द्धेन निरुञ्छनम्॥ १५॥
आधाने षट्पदं कुर्य्यात्सोमे तु द्विपदो भवेत्।
अग्नौ च त्रिपदं कुर्य्यात्प्रक्रमं याज्ञिको बुधः॥ १६॥
पञ्चदशमथैकविंशं त्रिकमपरं परतस्त्रिकं चापि।
द्वादशसु पाश उत्तम इति सोमे वेदिमानमिह॥ १७॥

पञ्चदशसु प्रक्रमे श्रोणिनिरुञ्छनार्थं चिह्नं, तत एकविंशतिप्रक्रमेषु आयाममानाय,

ततस्त्रिषु निरञ्छनाय, ततस्त्रिष्वंसाय, ततो द्वादशसु पाश इति । एवं चतुःपञ्चाशत्प्रक्रमा रज्जुरित्यर्थः ।

प्राकृतवेदिमाह—

षडरत्निर्द्विपाशा च मध्ये पञ्चसु चिह्निता ।
द्विहस्तेऽङ्गुलषट्के च त्रिष्वष्टादशकेषु च ।
सार्द्धहस्ते च पाशः स्याद्वेदिः स्यात्पौर्णमासिकी ॥ १८ ॥

पञ्चसु स्थानेषु । तानि च—द्विहस्ते श्रोण्यर्थम्, अङ्गुलषट्के श्रोणिनिरञ्छनाय, ततोऽष्टादशाङ्गुलेष्वायामाय, ततस्तावत्स्वंसनिरञ्छनाय, ततस्तावत्स्वंसाय । ततः सार्द्धहस्ते पाशः । अत्र निरञ्छनभेदादंसार्थं रज्जुविपर्ययो नेत्यर्थः ।

मध्यसंग्रहविधिमाह—

आनीय रज्जुं पूर्वार्द्धात्पश्चार्द्धं यावदेव तु ।
द्विगुणीकृत्य तां रज्जुं तत्र शङ्कुं निखातयेत् ॥ १९ ॥
वेदिश्रोण्यंसयोर्मध्ये तया रज्ज्वाऽष्टभागया ।
वा पृथुत्वतुरीयेण मध्येनालिख्य संग्रहौ ॥ २० ॥

चतुररत्निः पश्चात्, त्र्यरत्निः पूर्वभागे, त्र्यरत्निः प्रागपरायता च वेदिरस्ति । तत्र पूर्वार्द्धं पूर्वतिर्य्यङ्मानार्द्धे यः शङ्कुः प्राचीशङ्कुस्तस्माद्रज्जुं पश्चार्द्धं यावदानीय प्रतीच्यां तिर्य्यङ्मानीमध्ये यः शङ्कुस्तत्पर्य्यन्तं दक्षिणांसदक्षिणश्रोणिशङ्कुं वेष्टयन्नानीय सा त्वानीता रज्जुः सप्तपञ्चाशदधिकशताङ्गुला भवति, तां रज्जुं द्विगुणीकृत्य पूर्वार्द्धशङ्कोर्दक्षिणांसवेष्टनपूर्वकं निदध्यात् । एवमुत्तरतोऽपि । तत्र च दक्षिणोत्तरपार्श्वमान्योर्मध्ये शङ्कू द्वौ निखनेत् । तौ च शङ्कू अधस्तात्सार्द्धद्वाचत्वारिंशदङ्गुलान्ते श्रोण्योरुपरि सार्द्धत्रिंशदङ्गुलान्ते पततः तया सप्तपञ्चाशदधिकशताङ्गुलमितया रज्ज्वा अष्टभागया अष्टमो भागो यस्याः, अष्टौ वा भागा यस्याः, तयाऽष्टभागरूपया किञ्चिदधिकसार्द्धैकोनविंशत्यङ्गुलरूपया मध्येन श्रोण्यंसमध्यस्थशङ्कुनाऽऽलिख्य द्वौ सङ्ग्रहौ वेदेः संक्षेपौ कुर्य्यात् । अयमर्थः—तद्रज्जोरष्टमभागमितया रज्ज्वादिशङ्कावारोप्य वेद्यन्तर्द्धं कुर्य्यादेवमितरत्र । पक्षान्तरमाह—वा पृथुत्वतुरीयेण । यद्वा पृथुत्वस्य तुरीयेण चतुर्थांशेन संग्रहौ स्तः । अयमर्थः—श्रोण्यंसमध्यनिखातशङ्कोर्यत्पृथुत्वं दक्षिणोत्तरस्थापितसूत्रविस्तारः षड्भागोनषडशीत्यङ्गुलमितस्तस्य तुरीयांऽशः किञ्चिदूनसार्द्धैकविंशत्यङ्गुलात्मकः । तेन शङ्कोः स्थापितेन वेद्यन्तर्द्धं व्यासार्द्धं उभयत्र कुर्य्यादिति पौर्णमासिक्या वेदेर्मानम् । अन्यासु वेदिषु मध्यसंग्रहो नास्ति प्रमाणान्तरोपदेशात् ।

पशुवेदिमाह—

नवारत्निमिता रज्जुर्लक्षिता षट्स्वतःपरम् ।
अर्द्धेऽर्द्धे त्रिषु पाशः स्यात्पशुवेदिप्रसाधिनी ॥ २१ ॥

चतुररत्निश्रोणिस्त्र्यरत्न्यंसा षडरत्निप्राचीरूपा निरूढपशुबन्धवेदी । तत्र षडर-

त्निष्वायामाय, ततोऽद्धारत्नौ निरञ्छनाय, ततोऽर्द्धं श्रोण्यै, ततोऽर्द्धेऽसाय, ततस्त्रिष्वर्द्धेषु पाशाग्रेति ।

शालाविमितयोर्मानमाह—

विंशत्या तु करैः शाला दशायामेन विस्तृता ।
विमितं चतुरस्रं स्याद्दशारत्निप्रमाणतः ॥ २२ ॥

विंशतिहस्तायता दशहस्तविस्तारा शाला उदगायता प्राग्वंशा सोमे, सत्रेषूदग्वंशा । दशहस्तसमचतुरस्रन्तु विमितम् ।

सदसो मानमाह—

नवके लक्षणं कुर्यात्त्रीणि कुर्यात्त्रिषु त्रिषु ।
उत्तमो नवकः पाशः सदसो मानमुच्यते ॥ २३ ॥

नवारत्निषु श्रोण्यर्थं, ततस्त्रिषु श्रोणिनिरञ्छनाय, पुनस्त्रिष्वंसनिरञ्छनाय, ततस्त्रिष्वंसाय, ततो नवष्ठ पाश एवेति सदसो मानम् ।

सौत्रामणीवेदिमाह—

पदस्याक्ष्णया तिरश्ची च तयोरक्ष्णया च या भवेत् ।
सौत्रामण्यां मिमातव्या वेदिः स्यात्सोमवत्तथा ॥ २४ ॥

पदस्याक्ष्ण्येत्यस्यार्थः—पदमात्रसमचतुरस्रस्याक्ष्णया पार्श्वमानी कार्या । पदं तिर्यङ्मान्येव तिर्यङ्मानी, तयोरक्ष्णया पदत्रयसंक्षेपिका रज्जुः सौत्रामण्यां प्रक्रमः । द्वादशाङ्गुलपदसमचतुरस्रस्य याक्ष्णया सा पार्श्वमानी, तस्यैव या तिर्यङ्मानी सा अत्रापि तिर्यङ्मानी, तादृशस्य दीर्घचतुरस्रस्य याऽक्ष्णया रज्जुः सा सौत्रामण्यां प्रक्रमार्था । तत्परिमितेन काष्ठेन सोमवद्वेदिं कुर्यात् । अयमर्थः—तेन पूर्वोक्तेन प्रक्रमेण षट्त्रिंशत्प्रक्रमायामा चतुर्विंशतिप्रक्रमा पूर्वभागे, त्रिंशत्प्रक्रमा पश्चात्, एवं सोमवदुत्तरा वेदिर्भवति । अनग्न्यङ्गभूतायामपि इदमेवार्थात्तत्प्रमाणम् ।

अनेन विधिना यस्तु वेदिं कुर्यात्तु मानवः ।
यजमानं तथात्मानमुभौ तारयते ध्रुवम् ॥ २५ ॥
आज्ञात्वा शुल्वसद्भावं यज्ञे सौत्रामणीसुते ।
वेदिं ये कर्त्तुमिच्छन्ति गिरिं भिन्दन्ति ते नखैः ॥ २६ ॥
प्रमाणञ्च प्रमेयञ्च यच्चान्यद्वस्तु संज्ञितम् ।
सर्वं तच्छास्त्रतो ज्ञात्वा यज्ञे सिध्यन्ति याज्ञिकाः ॥ २७ ॥
यथा न क्षीयते मानं यथा च न विवर्द्धते ।
यथा च रमते दृष्टिस्तथा योगं समाचरेत् ॥ २८ ॥

अङ्गुलादिमानमाह—

तन्तुः पुष्करनालस्य षड्गुणः परिवेष्टितः ।
वत्सतर्यास्त्रिहायण्या वालेन सदृशो भवेत ॥ २९ ॥

त्रयस्त्रिहायणीबालाः सर्षपार्द्धं विधीयते ।
द्विगुणं सर्षपं विद्याद्यवः पञ्चैव सर्षपाः ॥ ३० ॥
अङ्गुलस्य प्रमाणन्तु षड्यवाः पार्श्वसम्मिताः ।
चतुर्विंशाङ्गुलोऽरत्निर्वितस्तिर्द्वादशाङ्गुला ॥ ३१ ॥
व्यासस्य च प्रमाणन्तु चतुर्न्यूनं शताङ्गुलम् ।
पुरुषस्य प्रमाणन्तु विंशतिश्च शताधिका ॥ ३२ ॥

प्रपदोच्छ्रित ऊर्ध्वबाहुः पुरुषः, तत्पञ्चमोंशोऽरत्निः । अत्र शास्त्रेऽरत्निहस्तौ पर्य्यायौ अरत्निश्चतुर्विंशाङ्गुलम्, अरत्न्यर्द्धं वितस्तिः, अङ्गुष्ठपष्ठोंऽशो यवोदरं, पञ्चमोंऽशः सर्षपः, सर्षपार्द्धतृतीयोंऽशस्त्रिहायणीबालः, तत्षष्ठोंऽशः पुष्करतन्तुरित्यर्थः ।

ह्रसते पाकशोषाभ्यां द्वात्रिंशद्भागमिष्टका ।
तस्मादार्द्रप्रमाणन्तु कार्य्यं मानाधिकं बुधैः ॥ ३३ ॥

अयं ह्रासः पादभागविषयः, पद्यादिषु तु द्विगुणचतुर्गुणादिर्यथायथं ज्ञेयः ।

खरलक्षणमाह—

अग्नीनां तु खरः कार्य्यो मेखलात्रयसँय्युतः ।
द्वादशाङ्गुल उच्छ्राये विस्तारे चतुरङ्गुलः ॥ ३४ ॥

उक्तखरमानाद्बहिर्मेखलात्रयं चतुरङ्गुलमुपर्य्युपरि निवेश्यम् । यथा त्रितयं मिलित्वा द्वादशाङ्गुलमुच्चं स्यात् ।

अरत्निश्चतुरस्रस्य पूर्वस्याग्नेः खरो भवेत् ।
रथचक्राकृतिः पश्चाच्चन्द्रार्द्ध इव दक्षिणः ॥ ३५ ॥

दक्षिणाग्नेः खरसाधनोपायः—

अग्नेरुदक् सार्द्धनवाङ्गुले मध्यं ततो लिखेत् ।
वृत्तमेकोनविंशत्या दक्षिणार्द्धं खरस्य तु ॥ ३६ ॥
चतुरस्रन्तु यावद्भिः प्रमाणैः कर्त्तुमिष्यते ।
एकोनद्विगुणैस्तैस्तु रज्जुरेकाधिकैर्मता ॥ ३७ ॥
त्र्यस्रीकृते तु तस्यां या मत्स्यसंक्षेपिका भवेत् ।
सैवेषुः करणी प्रोक्ता शुल्बकारेण चोदिता ॥ ३८ ॥

मत्स्यसंक्षेपिका रज्जुरिषुर्नाम, स च तावत्करणीत्यर्थः ।

चयने तूक्तविधिना कुर्यान्निर्माणमात्मनः ।
तुर्य्यांशेनात्मनः पक्षौ पुच्छञ्च रचयेत्ततः ॥ ३९ ॥
अधिमानं पञ्चमांशं पक्षयोरुभयोर्न्यसेत् ।
दशमांशेन पुच्छस्य पुच्छमप्यत्र वर्द्धयेत् ॥ ४० ॥
पुच्छस्य पक्षयोश्चापि पश्चादेवं नियोजयेत् ।
दशमांशं पञ्चमांशं लक्षणन्त्वधिमानकम् ॥ ४१ ॥

## सूत्रोक्तार्थकश्लोकसंग्रहः ।

षट्त्रिंशत्प्रक्रमाः प्राच्यां चतुर्विंशतिरंसयोः ।
श्रोण्योस्त्रिंशत्प्रक्रमाः स्युर्वेदो सोमादिके मखे ॥ ४२ ॥
सूत्रदोषदरिद्रस्य गूढमन्त्रमधीयतः ।
समाप्तेयं क्रिया शौल्बी कात्यायनमहात्मनः ॥ ४३ ॥

इति ।

इति शौल्बे विवरणे महीधरविनिर्म्मिते वेदीष्टकावर्द्धनाख्या
षष्ठीयं कण्डिकाऽगमत् ॥ ६ ॥

रसवेदाङ्गभूवर्षे मास्यन्त्ये धवले दले ।
त्रयोदश्यां रवेर्वारे वाराणस्यां महीधरः ॥ १ ॥
श्रीरत्नेश्वरमिश्रस्य गुरोः केशवजन्मनः ।
आज्ञया विवृत्तिं शौल्वीं भाष्यवृत्त्यनुसारिणीम् ॥ २ ॥
विदुषां सुखबोधाय व्यधाद् बुद्ध्यनुसारतः ।
भाष्यं रामकृतां वृत्तिं सूत्राण्यालोच्य तत्त्वतः ॥ ३ ॥
नीलकण्ठो रमानाथः सिताभश्चन्द्रशेखरः ।
भैरवेशः कृपासिन्धुः स मे तुष्यान्नृकेसरी ॥ ४ ॥

इति श्रीमन्महीधरविरचितं शुल्बसूत्रविवरणं सम्पूर्णम् ।

प्राप्तिस्थानम्—

जयकृष्णदास हरिदास गुप्तः—

चौखम्बा संस्कृत सीरिज़ आफिस,

बनारस सिटी ।

# शुल्बसूत्रानुक्रमः ।


| पृष्ठ० | | कं० | सू० |
|---|---|---|---|
| ६ | अक्ष्णया तिर्यङ्मानीशेषः | १ | १३ |
| ६ | अक्ष्णया तिर्यङ्मानी शेषः | १ | १५ |
| १० | अङ्गुलै रथसंमितायाः० | २ | १ |
| १९ | अतिदीर्घे चेत्तिर्यङ्० | ३ | ३ |
| ८ | अपरिमितं० | १ | २३ |
| १० | अपिवान्तरत्रिभागो० | १ | २९ |
| २० | अर्धप्रमाणेन पादप्रमाणं० | ३ | ८ |
| २६ | आद्योऽग्निर्द्विगुणः० | ५ | २ |
| ९ | इतरस्य० | १ | २६ |
| २६ | उत्तरेषु० | ५ | १ |
| १३ | उपदिष्टं० | २ | १० |
| २५ | उभयतः प्रउगं० | ४ | ८ |
| २४ | उभयतः प्रउगे० | ४ | ६ |
| २७ | एकविंशा० | ५ | ३ |
| ३५ | एके प्रथमोत्तमौ० | ६ | १२ |
| ७ | एतेन० | १ | १९ |
| २५ | एतेनैव० | ४ | ९ |
| ५ | एवमुत्तरतः | १ | ९ |
| ३२ | एवमेक० | ६ | ५ |
| १३ | एवं द्विपदा० | २ | ९ |
| २१ | एष निर्ह्रास० | ३ | ११ |
| १२ | करणी तत्करणी० | २ | ७ |
| १६ | करणीतृतीयं० | २ | १७ |
| १४ | करणीं तृतीयेन० | २ | १३ |
| ९ | गार्हपत्याहवनीययो० | १ | २७ |
| २१ | चतुरस्रं० | ३ | १३ |
| १७ | चतुरस्राच्चतुरस्रं० | ३ | १ |
| २१ | चतुर्थेन षोडशी० | ३ | १० |
| ११ | चतुःशतमक्षः | २ | ३ |

| पृष्ठ० | | कं० | सू० |
|---|---|---|---|
| ११ | चत्वारोऽष्टकाः० | २ | ५ |
| ११ | तत्राष्टाशीति० | २ | २ |
| ८ | तत्रोदीची० | १ | २१ |
| ३ | तदन्तरं रज्ज्वाऽभ्यस्य० | १ | ३ |
| २३ | तद्दशमेना० | ४ | ३ |
| १७ | तुल्यप्रमाणाना० | २ | २१ |
| १५ | तृतीयक० | २ | १५ |
| २१ | तृतीयेन० | ३ | ९ |
| ३४ | तेन वेदिं० | ६ | १० |
| १६ | तृतीयकरणी० | २ | २० |
| १३ | दीर्घचतुरस्रस्य० | २ | ११ |
| १८ | दीर्घचतुरस्रं० | ३ | २ |
| २३ | द्रोणचिद्रथ० | ४ | १ |
| २३ | द्रोणे यावानग्निः० | ४ | २ |
| ३२ | द्वितीये वा० | ६ | ३ |
| २५ | द्विकर्णानां० | ४ | १२ |
| २० | द्विःप्रमाणा० | ३ | ६ |
| १६ | नवभागास्त्रय० | २ | १८ |
| १७ | नानाप्रमाण० | २ | २२ |
| ३२ | नान्तःपात्य० | ६ | ६ |
| ३० | नारत्निवितस्तीना० | ५ | ११ |
| २५ | पञ्चकर्णानां च | ४ | १० |
| २८ | पञ्चविभागेन० | ५ | ६ |
| २९ | पञ्चदशविभागो० | ५ | ८ |
| २९ | पञ्चारत्निः० | ५ | ९ |
| १२ | पदं तिर्यङ्मानी० | २ | ८ |
| ३५ | पार्श्वयोर्वा० | ६ | ११ |
| २८ | पुरुषं वा० | ५ | ७ |
| २९ | पुरुषं वा० | ५ | १० |

| पृष्ठ० | | कं० | सू० |
|---|---|---|---|
| २७ | पुरुषाभ्यासे० | ५ | ४ |
| ११ | पैतृक्यां० | २ | ६ |
| २४ | प्रउगं चतुरस्त्रं० | ४ | ७ |
| २४ | प्रउगे० | ४ | ५ |
| २५ | प्रउगेऽप० | ४ | ११ |
| ३२ | प्रक्रमेण वा० | ६ | ४ |
| ५ | प्रमाणमभ्यस्य० | १ | १२ |
| १५ | प्रमाणवि० | २ | १६ |
| २० | प्रमाणं चतु० | ३ | ५ |
| १५ | प्रमाणं तिर्यक् द्वि० | २ | १४ |
| ७ | प्रमाणार्द्धं० | १ | १६ |
| ८ | प्रमाणे० | १ | २४ |
| ४ | प्राच्यन्तयोः शङ्कू० | १ | ६ |
| ६ | प्रमाणार्थं० | १ | १४ |
| २२ | मण्डलं चतुरस्त्रं० | ३ | १४ |
| २४ | मण्डलेऽप्येवम् | ४ | ४ |
| ३० | यथाग्नि षेदी० | ६ | १ |
| ३३ | यथायूपं० | ६ | ८ |
| ३१ | या करणी० | ६ | २ |
| ३४ | या रज्जुरे० | ६ | ९ |
| २० | यावत्प्रमाणा० | ३ | ७ |
| २१ | यावत्प्रमाणा रज्जु० | ३ | १२ |
| ३३ | यावत्प्रमाणानि० | ६ | ७ |
| ९ | योगश्च | १ | २५ |
| १ | रज्जुसमासं० | १ | १ |
| ३ | रज्ज्वन्तयोः पा० | १ | ४ |
| ५ | विपर्यस्येतरतः० | १ | १० |
| ९ | विपर्यस्यो० | १ | २८ |
| १० | विपर्यस्योत्त० | १ | ३० |
| ७ | शकटमुखस्य० | १ | १८ |
| ४ | शङ्कोः पाशौ० | १ | ८ |
| ७ | शालामानं च | १ | २० |
| ७ | शाखवदर्द्धं० | १ | १७ |
| ४ | श्रोण्यंस० | १ | ५ |
| ४ | श्रोण्योरं० | १ | ७ |
| ११ | षडशीतिर्युगम् | २ | ४ |
| ८ | सदसश्चैवम् | १ | २२ |
| १९ | समचतुरस्त्रं० | ३ | ४ |
| १४ | समचतुरस्त्रस्या० | २ | १२ |
| २७ | समस्तं पञ्च० | ५ | ५ |
| २ | समे शङ्कुं० | १ | २ |
| ५ | स समाधिः० | १ | ११ |
| ३५ | सैषा शिखः० | ६ | १३ |
| १६ | सौत्रामण्यां० | २ | १९ |

# कर्कश्लोकशुल्बानुक्रमः ।


| पृष्ठ० | | श्लो० |
|---|---|---|
| ३८ | अग्नेरुदक्० | ३८ |
| ३७ | अप्सुदीर्घं० | १८ |
| ३६ | अविद्धं० | ११ |
| ३८ | अज्ञात्वा० | ३१ |
| ३८ | आधाने० | ३४ |
| ३७ | उत्तमो नवकः० | १५ |
| ३८ | उदगर्द्धं० | ३९ |
| ३६ | करणीनां० | ५ |
| ३७ | कात्यायनो० | १४ |
| ३८ | कृत्तिका० | ३५ |
| ३७ | कृष्णलेनैव | २७ |
| ३७ | चतुर्विंशां० | २५ |
| ३६ | जरठं चा० | ७ |
| ३८ | दण्डरज्ज्वर्धं० | ३२ |
| ३७ | द्वादशसु० | १६ |
| ३७ | द्वादशाङ्गुल० | २२ |
| ३७ | द्विगुणं० | २४ |
| ३६ | द्विहस्ते० | १ |
| ३६ | नान्यद्दूरं० | ४ |
| ३७ | पुरुषस्य० | २६ |

| पृष्ठ० | | श्लो० |
|---|---|---|
| ३८ | पञ्चाशच्छर्करा० | ३६ |
| ३७ | भूयः स्थपति० | २९ |
| ३७ | यथा च० | २० |
| ३८ | यावत्प्रमाणा० | ३३ |
| ३६ | रज्जुर्मानाधिका० | १२ |
| ३६ | रज्जुस्तूभय० | १३ |
| ३७ | रथचक्रा० | २१ |
| ३७ | वत्सतर्या० | २३ |
| ३६ | शङ्कुराम० | १० |
| ३६ | शङ्कुस्तेन० | ८ |
| ३६ | शङ्कुः कार्यस्तु० | ९ |
| ३६ | शिल्पिभ्यः० | ६ |
| ३८ | शंस्यश्चतु० | ३७ |
| ३६ | समभूमौ० | ३ |
| ३८ | समाप्तेर्यं० | ४० |
| ३७ | सर्वं तच्छा० | १९ |
| ३७ | सार्धहस्ते० | २ |
| ३७ | सुवर्णार्द्धं० | २८ |
| ३७ | सौत्रामण्यां० | १७ |
| ३७ | हसते० | ३० |


इति ।

# महीधरश्लोकशुल्बानुक्रमः ।


| पृष्ठ० | | श्लो० |
|---|---|---|
| ४२ | अग्नीनां तु खरःकार्यः० | ३४ |
| ४२ | अग्नेरुदक्० | ३६ |
| ४२ | अङ्गुलस्य० | ३१ |
| ३९ | अर्जीर्णा० | १० |
| ४२ | अधिमानम्० | ४० |
| ४१ | अज्ञात्वा० | २६ |
| ४२ | अरत्निश्चतु० | ३५ |
| ३९ | आधाने पदिकं० | १६ |
| ४० | आनीय रज्जुं० | १९ |
| ४१ | अनेन विधिना० | २५ |
| ३९ | एकतश्च० | ६ |
| ३९ | कृत्तिका श्रवणः पु० | १४ |
| ४२ | चतुरस्त्रं तु० | ३७ |
| ४२ | चयने तूक्त० | ३९ |
| ४१ | तन्तुः पुष्कर० | २९ |
| ३८ | तिर्यङ्मान्याश्च० | ३ |
| ४२ | त्रयस्त्रिहायणी० | ३० |
| ४२ | त्र्यस्त्रीकृते० | ३८ |
| ३९ | द्विवितस्ति० | ८ |
| ३६ | द्विहस्ते० | १ |
| ३८ | न जलात्सम० | ४ |
| ४० | नचारत्निमिता० | २१ |
| ४१ | नवके लक्षणं० | २३ |
| ३९ | पञ्चदशमथैक० | १७ |
| ४१ | पदस्याक्ष्ण्या० | २४ |
| ४१ | प्रमाणं च प्र० | २७ |
| ३९ | प्रादेशमात्रो० | ७ |
| ४२ | पुच्छस्य० | ४१ |
| ३९ | मुद्गरं चतुरस्त्रं० | ९ |
| ४१ | यथा न क्षीयते० | २८ |
| ३९ | यावत्प्रमाणा रज्जुः० | १५ |
| ३९ | रज्जुर्मुञ्जमयी० | १२ |
| ४१ | विंशत्या तु करैः० | २२ |
| ४० | वेदिश्रोण्यं० | २० |
| ४२ | व्यासस्य च० | ३२ |
| ३९ | शङ्कुस्त्र्यंश० | १३ |
| ३९ | शाणी वा बाल्वजी० | ११ |
| ३८ | शास्त्रबुद्धि० | २ |
| ४३ | षट्त्रिंशत्० | ४२ |
| ३९ | षडङ्गुलय० | ५ |
| ४३ | षडरत्निर्द्धि० | १८ |
| ४० | सूत्रदोष० | ४३ |
| ३८ | संख्याज्ञः० | १ |
| ४२ | ह्रसते पाक० | ३३ |


इति ।


प्राप्तिस्थानम्—
जयकृष्णदास हरिदासगुप्तः
चौखम्बा संस्कृत सीरिज् आफिस,
बनारस सिटी ।



46029
23.1.74